गैर्वाणीगौरवग्रन्थमाला

गीर्वाणवाणीगौरवभूतप्रत्नानूतनलघुग्रन्थानांसङ्कलनम्

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठशोधपत्रिकायाः
परिशिष्टम्

तृतीयं प्रसूनम्

शिल्हण कृतं

शान्तिशतकम्

मूल संपादिका
डॉ० शोभारानी मजूमदार

पुनरीक्षिका
डॉ० माया मालवीय

Journal of G. N. Jha Kendriya Sanskrit Vidyapeetha
Vol. XXXVI No. 1—2

गीर्वाणगौरवग्रन्थमाला

गीर्वाणवाणीगौरवभूतप्रत्ननूतनलघुग्रन्थानां सङ्कलनम्

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठशोधपत्रिकायाः
परिशिष्टम्

तृतीयं प्रसूनम्

शिल्हण कृतं
शान्तिशतकम्

मूल संपादिका

डॉ॰ शोभारानी मजूमदार

पुनरीक्षिका

डॉ॰ माया मालवीय

Reprinted form the
Journal of G. N. Jha Kendriya Sanskrit Vidyapeetha
Vol. XXXVI No. 1—2

गैर्वाणीग्रन्थमाला गंगानाथझा-केन्द्रीय-संस्कृत-विद्यापीठ-शोधपत्रिकायाः परिशिष्टरूपेण प्रकाश्यते। अस्यामप्रकाशितानि पुनःसंपादितानि वा विविधग्रन्थ-प्रसूनानि संगृहीतानि भवन्ति। एतानि पुस्तकप्रसूनानि स्वतन्त्रतयापि स्वल्पमूल्येन क्रेतुं शक्यन्ते।

प्रधानसम्पादकः प्रकाशकश्च
डा० गयाचरण त्रिपाठी
प्राचार्यः
गंगानाथझा केन्द्रीय संस्कृत विद्यापीठम्
प्रयाग-२

'बलरामपुरहाउस' स्थिते शाकुन्तल-मुद्रणालये मुद्रिता

FOREWORD

We are happy to place in the hands of the lovers of Sanskrit Poetry a fresh edition of the *Śānti Śatakam* of the Buddhist Poet Śilhaṇa. Though this work has been previously published from Calcutta, Bombay and Leipzig, its text was not yet properly restored. Mrs. Sobha Rani Mazumdar has tried to reconstruct and critically edit the text on the basis of a number or Manuscripts available in this Vidyapeetha as well as elsewhere. The work is a part of the Doctoral Thesis presented by Mrs. Mazumdar to the Rashtriya Sanskrit Sansthan for the award of the Degree of the Vidyavaridhi.

Though Mrs. Mazumdar shunned no efforts in preparing this addition, there were still many elements of imperfection in it as are usually unavoidable in the works of young research scholars. I, therefore, entrusted the task of revising and re-editing the work in question to Dr. (Mrs.) Maya Malaviya, Research Officer in our Institute. I also placed at her desposal a fresh Manuscript of **Śanti-Śatakam** (designated as *ma* in the list of manuscripts) which I had received from Shri Vishnu Brahmachari of the Saccha Ashram in Arail, Allahabad in 1957 while we were studying together at Moradabad and which has proved to be very helpful in restoring the text. Dr. Malaviya has spared no pains in

revising the text and the translation part of the work and she deserves my sincere thanks as well as congratulations. Even though the text might still appear to have further scope of amendations, there can be no doubt that this edition is in many ways an improvement upon the previous ones.

We hope that the Sanskritists shall welcome the publication of this beautiful treatise which seeks to evoke and strengthen the desire towards renunciation of the world and propounds the futility of the mundane pleasures.

G. C. Tripathi
Principal

भूमिका

सुभाषितसंग्रहस्य एकः प्रकारः नीतिनाम्ना व्यवह्रियते । नीयन्ते संलभ्यन्ते उपायादयः, ऐहिकामुष्मिकार्था वा अनया[1], सदसद्विवेकपरिपूरिते सन्मार्गे नयति वा या सा नीतिः[2], इत्यादिभिः व्युत्पत्तिभिः नीतिशब्दः पुरुषार्थचतुष्टयप्रसंगे मार्गदर्शकभूतेषु वाक्येषु रूढः । अपि वा नीयते व्यवस्थाप्यते स्वेषु स्वेषु सदाचारेषु चतुर्वर्णाश्रमलक्षणो लोको यस्यां सा नीतिः[3] इत्यादि व्युत्पत्त्या सद्व्यवहारेषु व्यवस्थापकानि वाक्यानि नीतिपदानि उच्यन्ते । नीतिवाक्यानां विषयेषु नीतिपदस्य प्रयोगः वैदिककालादेव आरब्ध आसीदिति भवा सुनीतिरुत वामनीतिः[4] ऋजुनीतिर्नो वरुणो नयतु[5] इत्यादिभिः नीतिपदप्रयोगैः वक्तुं शक्यते । जयादित्यो वामनः सामदामाद्युपायान् नीतिपदार्थानाह ।[6] पाश्चात्येषु विद्वत्स्वपि नीतिशास्त्रपरम्परा सुतरां व्यराजत तत्रेदं शास्त्रं एथिक्स (Ethics) इति नाम्ना व्यवहृतम् ।[7] यद्यपि तत्र शास्त्रे पथप्रदर्शकभूतानां निर्देशानां न तथा निवेचनं कृतमस्ति, यथा शुभविषये दार्शनिकं विवेचनं विहितम् ।

इयं नीतिकाव्यपरम्परा सुभाषितसंग्रहपरम्पराक्षेत्रमनुवर्तमानापि तया सर्वथा भिन्नैवास्ति । यतः सुभाषितसंग्रहेषु सामान्यतोऽनेकेषां विदुषां पद्यानां संग्रहः कृतो भवति । नीतिकाव्यानि तु न तथा भवन्ति संग्रहभूतानि । इमानि एकस्य कस्यापि कवेरेव प्रतिभाप्रसूतिभूतानि भवन्ति ।[8] तद् यथा चाणक्यस्य नीतिशास्त्रं, शुक्रस्य बृहस्पतेश्च नीतिशास्त्रं,

---

१. संस्कृत शब्दार्थ कौस्तुभ—श्री झा तथा चतुर्वेदी पृ० ६११ ।

२. मोनियर विलियम्स डिक्शनरी ।

३. नीतिवाक्यामृतम् ।

४. ऋग्वेद—६।४७।७ ।

५. तत्रैव १।९०।१ ।

६. काशिका—५।३।७७ ।

७. नीतिप्रवेशिका ।

८. Anthologies are collections of verses composed by different authors, while the gnomic and didactic poems are collections of verses composed by one author only.
(म० सु० सं० पृष्ठ (cxiii) वी० वरदाचार्य—पृष्ठ १०३ ।

कामन्दकीयनीतिसारः, विदुरनीतिः, भर्तृहरिशतकानि, दर्पदलनम्, चारुचर्याशतकम् इत्यादि। एषु नीतिकाव्येषु बार्हस्पत्यं नीतिशास्त्रं नाद्यापि सुलभम्।[1] विदुरनीतिस्तु कृष्णद्वैपायन-व्यासकृतस्य महाभारतस्यांशभूता। कदाचित् नीतिसंग्रहेष्वपि द्वि त्रीणि पद्यानि इतस्ततोऽपि संकलितानि दृश्यन्ते। आचारप्राधान्यात् नीतिग्रन्थेषु नीतिवाक्येषु वा सर्वत्रापि धर्मदर्शनयोः प्रभावः परिलक्ष्यते।[2] सर्वेऽपि धर्मग्रन्थाः नीतिविषयका एव; यद्यपि नीतिशिक्षासु सामाजिक-सद्भावं, दैनिकव्यवहारं राजनीतिं वाऽधिकृत्यापि नीतिग्रन्थानां रचना कृता भवति। संस्कृत-वाङ्मये पशुपक्षीणां दृष्टान्तावगूहनेन सह पंचतन्त्रहितोपदेशप्रभृतयः नीतिग्रन्थाः रचिताः। बौद्धवाङ्मये जातकग्रन्था अपि एतादृशा एव यत्र पशवः पक्षिण इतरे वा जन्तवः कथानायक-भूताः समुपनिबद्धाः।

महाभारते भीष्मविदुरयोरुपदेशः[3] रामायणे लक्ष्मणं प्रति रामस्योपदेशः ब्रह्माण्डपुराणे सहस्रार्जुनं प्रति दत्तात्रेयस्योपदेशः शिवपुराणे शिवयोगिनः राजकुमारं प्रत्युपदेशश्च उपदेश-काव्ये एव परिगणितुं शक्यते। अत्र काव्येषु साक्षात् उपदेश एव निबद्धो भवति। श्रीमद्-भागवते कपिलप्रह्लादयोः संवादोऽपि नीतिकाव्यपरम्परायां परिगणनयोग्यः यत्र संवादमाध्य-मेनैव नीतिविषयाः शिक्षाः निबद्धाः सन्ति।

नीतिकाव्यभेदाः

नीतिकाव्यानां विभागः देशकालाद्यधिकृत्य अनेकधा कर्तुं शक्यते। यथा एकदेशीया-नीतिः, सार्वदेशीया नीतिः, आपद्नीतिः, शाश्वतनीतिः, वैयक्तिकीनीतिः, पारिवारिकीनीतिः, सामाजिकीनीतिः, राष्ट्रियानीतिः, अन्तर्राष्ट्रियानीतिः। विषयमधिकृत्यापि नीतिकाव्यस्य विभागः कर्तुं शक्यते। यथा—युद्धनीतिः, शासननीतिः, अर्थनीतिः, व्यापारनीतिः, शिक्षानीतिः, विज्ञान-नीतिश्चेति। एवं क्रियमाणो विभागः अनन्ततामापद्येत इति सामान्यतः नीतिकाव्यानि चतुर्धा विभज्यन्ते—धर्मनीतिः, अर्थनीतिः, कामनीतिः, मोक्षनीतिश्चेति। यतो हि पुरुषार्थाः चत्वार एव स्वीक्रियन्ते इति एकैकं पुरुषार्थमधिकृत्य तत्साधनोपायभूता नीतिरपि चतुर्धैव विभज्येत इति न भवेत् काचन विप्रतिपत्तिः। भर्तृहरिणा स्वीयनीतिकाव्यनिर्माणप्रसंगे धर्मार्थावेकत्रैव कृत्वा नीतिशतके समावेशितौ। कामनीतिश्च तेन शृंगारशतके, मोक्षनीतिश्च वैराग्यशतके निबद्धा। तमनुसरता पुरुषेण नीतिकाव्यानि त्रिष्वपि भागेषु विभक्तुं शक्यन्ते-धर्मार्थनीतिः, कामनीतिः, मोक्षनीतिश्च। शान्तिशतकं एषु विभागेषु चरमे परिगणनार्हम्। यतो ह्यत्र प्रायशः मोक्षसाधनहेतुभूतं वैराग्यमुद्भावयितुं रागस्य आलम्बनभूतेषु पदार्थेषु वितृष्णा समुत्पादिता-स्ति। शिल्हणकृतमिदं नीतिकाव्यं सुचिरादेव विद्वत्सु मनोहारितया समादृतम्।

---

१. सं० सा० सं० इति० पृ० ८१४, क्ला० सं० पृ० ११४, म० सु० सं० पृ० (cxiii)।
२. क्ला० सं० लि० पृष्ठ ३११।
३. एच० ओ० इ० लि० भाग—२ पृष्ठ १४३।

इदं चात्रावधेयं यद् यद्यपि नीतिकाव्येषु सामान्यतः स्वीयानामेव काव्यानां (पद्यानां) संकलनं भवति, परमत्र शान्तिशतके संकलिता अनेके श्लोकाः भर्तृहरिकृते वैराग्यशतके समुपलभ्यन्ते। यतो हि भर्तृहरिः षष्ठशताब्द्यां सम्बभूव, शिल्हणश्च त्रयोदशशताब्द्यां इति शिल्हणेन वैराग्यशतकात् पद्यसंग्रहः कृतः इति निर्विवादं स्वीकर्तुं शक्यते। इदमेव च परेषामपि विदुषामभिनतम्।

शान्तिशतकस्य विषयवस्तु

अत्र शान्तिशतके षडुत्तरमेकशतं पद्यानां निबद्धमस्ति, तानि च चतुर्षु परिच्छेदेषु विभक्तानि। एतानि च परितापोपशान्तिः, विवेकोदयः, कर्तव्योपदेशाः, ब्रह्मप्राप्तिरित्यभिधेयानि सन्ति, यत्र समेषामपि पद्यानां समावेशः कृतोऽस्ति।[1]

अत्र ग्रन्थे परितापोपशान्तिनाम्नः प्रथमस्य परिच्छेदस्य प्रथमे पद्ये रचनाप्रकारेण देवेभ्योऽपि बलवत्तरं कर्म इति प्रतिपाद्य कविना कर्मभ्यो नतिर्विहिता।[2] द्वितीये च कविः स्वनाम निर्देशपूर्वकं क्रियमाणं ग्रन्थं सन्तोषजनकं संसारसागरदुःखविनाशबीजञ्चेति प्रस्तावेन सह विदधते इति निर्दिशति। अत्र पद्ये काव्यकर्मणि प्रवृत्तः कविः स्वक्रियमाणां क्रियां लिडन्तेन आख्यातेन (विदधे पदेन) निर्दिशति। अयं च लिट् परोक्षभूतार्थे प्रयुज्यते न वर्तमानार्थे, न वा भविष्यदर्थे न वा वर्तमानसमीपस्थे कस्मिन्नपि काले। अत्रैव च शिल्हणपदविशेषणभूतः प्रकृतिसुन्दरशुद्धबुद्धिः पदोऽपि प्रयुक्तः, यः शिल्हणपदवाच्यं कविमेव विशेषयति। तदिदं सर्वमपि अद्भुततया विचार्यतामेवापतति। तृतीयाद् पद्यादारम्य त्रिंशत्तमं पद्यं यावत् अष्टाविंशतिषु पद्येषु उपभोगयोग्यानि वस्तूनि नितरां जुगुप्सार्हाणि इति प्रतिपादितम्। अत्र प्रसंगे कविना इदं निर्दिष्टं यत् शलभस्तु दाहवेदनामजानन् दीपदहनं विशति, मीनो बडिशपिशितमजानन्नेवाश्नाति, परं पुरुषस्तु जानन्नपि विपज्जालजटिलान् कामान् कामयते इत्यद्भुतम्।[3]

अत एव मुनिजनाः इदं सर्वं त्यजन्तः नितराम्ब्रह्मणि रताः भवन्ति। साधारणाश्च तत्र विषयेष्वेव रमन्ते।[4] यः पुरुषः ब्रह्मभूतं देवं नारायणं विहाय कामान् कामयते, तेषां तु जन्म एव निरर्थकं भवति।[5] एकत्र च रेतशोणितयोः परिणतिभूतं मृत्योरास्पदं रोगादिविश्रामभूमिभूतं शरीरं ये पुत्रकाम्यन्ति स्त्रीयन्ति वा, ते नूनं विवेकरहिता इति प्रतिपा-

---

१. कम्पै० टू० सं० लि० पृ० ६३, म० सु० सं० पृ०।

२. श्लोक संख्या ७।

३. श्लोक ७।

४. श्लोक ६।

५. श्लोक ११, १२।

कामन्दकीयनीतिसारः, विदुरनीतिः, भर्तृहरिशतकानि, दर्पदलनम्, चारुचर्याशतकम् इत्यादि। एषु नीतिकाव्येषु बार्हस्पत्यं नीतिशास्त्रं नाद्यापि सुलभम्।[1] विदुरनीतिस्तु कृष्णद्वैपायन-व्यासकृतस्य महाभारतस्यांशभूता। कदाचित् नीतिसंग्रहेष्वपि द्वि त्रीणि पद्यानि इतस्ततोऽपि संकलितानि दृश्यन्ते। आचारप्राधान्यात् नीतिग्रन्थेषु नीतिवाक्येषु वा सर्वत्रापि धर्मदर्शनयोः प्रभावः परिलक्ष्यते।[2] सर्वेऽपि धर्मग्रन्थाः नीतिविषयका एव; यद्यपि नीतिशिक्षासु सामाजिक-सद्भावं, दैनिकव्यवहारं राजनीतिं वाऽधिकृत्यापि नीतिग्रन्थानां रचना कृता भवति। संस्कृत-वाङ्मये पशुपक्षीणां दृष्टान्तावगूहनेन सह पंचतन्त्रहितोपदेशप्रभृतयः नीतिग्रन्थाः रचिताः। बौद्धवाङ्मये जातकग्रन्था अपि एतादृशा एव यत्र पशवः पक्षिण इतरे वा जन्तवः कथानायक-भूताः समुपनिबद्धाः।

महाभारते भीष्मविदुरयोरुपदेशः[3] रामायणे लक्ष्मणं प्रति रामस्योपदेशः ब्रह्माण्डपुराणे सहस्रार्जुनं प्रति दत्तात्रेयस्योपदेशः शिवपुराणे शिवयोगिनः राजकुमारं प्रत्युपदेशश्च उपदेश-काव्ये एव परिगणितुं शक्यते। अत्र काव्येषु साक्षात् उपदेश एव निबद्धो भवति। श्रीमद्-भागवते कपिलप्रह्लादयोः संवादोऽपि नीतिकाव्यपरम्परायां परिगणनयोग्यः यत्र संवादमाध्य-मेनैव नीतिविषयाः शिक्षाः निबद्धाः सन्ति।

नीतिकाव्यभेदाः

नीतिकाव्यानां विभागः देशकालाद्यधिकृत्य अनेकधा कर्तुं शक्यते। यथा एकदेशीया-नीतिः, सार्वदेशीया नीतिः, आपद्नीतिः, शाश्वतनीतिः, वैयक्तिकीनीतिः, पारिवारिकीनीतिः, सामाजिकीनीतिः, राष्ट्रियानीतिः, अन्तर्राष्ट्रियानीतिः। विषयमधिकृत्यापि नीतिकाव्यस्य विभागः कर्त्तुं शक्यते। यथा—युद्धनीतिः, शासननीतिः, अर्थनीतिः, व्यापारनीतिः, शिक्षानीतिः, विज्ञान-नीतिश्चेति। एवं क्रियमाणो विभागः अनन्ततामापद्येत इति सामान्यतः नीतिकाव्यानि चतुर्धा विभज्यन्ते—धर्मनीतिः, अर्थनीतिः, कामनीतिः, मोक्षनीतिश्चेति। यतो हि पुरुषार्थाः चत्वार एव स्वीक्रियन्ते इति एकैकं पुरुषार्थमधिकृत्य तत्साधनोपायभूता नीतिरपि चतुर्धैव विभज्येत इति न भवेत् काचन विप्रतिपत्तिः। भर्तृहरिणा स्वीयनीतिकाव्यनिर्माणप्रसंगे धर्मार्थावेकत्रैव कृत्वा नीतिशतके समावेशितौ। कामनीतिश्च तेन शृंगारशतके, मोक्षनीतिश्च वैराग्यशतके निबद्धा। तमनुसरता पुरुषेण नीतिकाव्यानि त्रिष्वपि भागेषु विभक्तुं शक्यन्ते-धर्मार्थनीतिः, कामनीतिः, मोक्षनीतिश्च। शान्तिशतकं एषु विभागेषु चरमे परिगणनार्हम्। यतो ह्यत्र प्रायशः मोक्षसाधनहेतुभूतं वैराग्यमुद्भावयितुं रागस्य आलम्बनभूतेषु पदार्थेषु वितृष्णा समुत्पादिता-स्ति। शिल्हणकृतमिदं नीतिकाव्यं सुचिरादेव विद्वत्सु मनोहारितया समादृतम्।

---

१. सं० सा० सं० इति० पृ० ८१४, क्ला० सं० पृ० ११४, म० सु० सं० पृ० (cxiii)।

२. क्ला० सं० लि० पृष्ठ ३११।

३. एच० ओ० इ० लि० भाग—१ पृष्ठ १४३।

इदं चात्रावधेयं यद् यद्यपि नीतिकाव्येषु सामान्यतः स्वीयानामेव काव्यानां (पद्यानां) संकलनं भवति, परमत्र शान्तिशतके संकलिता अनेके श्लोकाः भर्तृहरिकृते वैराग्यशतके समुपलभ्यन्ते। यतो हि भर्तृहरिः षष्ठशताब्द्यां सम्बभूव, शिल्हणश्च त्रयोदशशताब्द्यां इति शिल्हणेन वैराग्यशतकात् पद्यसंग्रहः कृतः इति निर्विवादं स्वीकर्तुं शक्यते। इदमेव च परेषामपि विदुषामभिमतम्।

शान्तिशतकस्य विषयवस्तु

अत्र शान्तिशतके षडुत्तरमेकशतं पद्यानां निबद्धमस्ति, तानि च चतुर्षु परिच्छेदेषु विभक्तानि। एतानि च परितापोपशान्तिः, विवेकोदयः, कर्तव्योपदेशः, ब्रह्मप्राप्तिरित्यभिधेयानि सन्ति, यत्र समेषामपि पद्यानां समावेशः कृतोऽस्ति।[1]

अत्र ग्रन्थे परितापोपशान्तिनाम्नः प्रथमस्य परिच्छेदस्य प्रथमे पद्ये रचनाप्रकारेण देवेभ्योऽपि बलवत्तरं कर्म इति प्रतिपाद्य कविना कर्मभ्यो नतिर्विहिता।[2] द्वितीये च कविः स्वनाम निर्देशपूर्वकं क्रियमाणं ग्रन्थं सन्तोषजनकं संसारसागरदुःखविनाशबीजञ्चेति प्रस्तावेन सह विदधते इति निर्दिशति। अत्र पद्ये काव्यकर्मणि प्रवृत्तः कविः स्वक्रियमाणां क्रियां लिडन्तेन आख्यातेन (विदधे पदेन) निर्दिशति। अयं च लिट् परोक्षभूतार्थे प्रयुज्यते न वर्तमानार्थे, न वा भविष्यदर्थे न वा वर्तमानसमीपस्थे कस्मिन्नपि काले। अत्रैव च शिल्हणपदविशेषणभूतः **प्रकृतिसुन्दरशुद्धबुद्धिः** पदोऽपि प्रयुक्तः, यः शिल्हणपदवाच्यं कविमेव विशेषयति। तदिदं सर्वमपि अद्भुततया विचार्यतामेवापतति। तृतीयाद् पद्यादारम्य त्रिंशत्तमं पद्यं यावत् अष्टाविंशतिषु पद्येषु उपभोगयोग्यानि वस्तूनि नितरां जुगुप्सार्हाणि इति प्रतिपादितम्। अत्र प्रसंगे कविना इदं निर्दिष्टं यत् शलभस्तु दाहवेदनामजानन् दीपदहनं विशति, मीनो बडिशपिशितमजानन्नेवाश्नाति, परं पुरुषस्तु जानन्नपि विपज्जालजटिलान् कामान् कामयते इत्यद्भुतम्।[3]

अत एव मुनिजनाः इदं सर्वं त्यजन्तः नितराम्ब्रह्मणि रताः भवन्ति। साधारणाश्च तत्र विषयेष्वेव रमन्ते।[4] यः पुरुषः ब्रह्मभूतं देवं नारायणं विहाय कामान् कामयते, तेषां तु जन्म एव निरर्थकं भवति।[5] एकत्र च रेतशोणितयोः परिणतिभूतं मृत्योरास्पदं रोगादिविश्रामभूमिभूतं शरीरं ये पुत्रकाम्यन्ति स्त्रीयन्ति वा, ते नूनं विवेकरहिता इति प्रतिपा-

---

१. कम्पै० टू० सं० लि० पृ० ९३, म० सु० सं० पृ०।

२. श्लोक संख्या ७।

३. श्लोक ७।

४. श्लोक ९।

५. श्लोक ११, १२।

दितम् ।[1] तदेवं अत्र प्रथमपरिच्छेदे सर्वथा मोहो हेयः, तृष्णा छेद्या, सन्तोषामृतरसः पेयः ब्रह्म चोपास्यं इति प्रतिपादितम् ।

षट्विंशतिपद्यात्मके विवेकोदयनामके द्वितीये परिच्छेदे जगदसारं सकलो जीवलोकः स्वप्नेन्द्रजालसदृशः, अमृतमिव प्रतीयमानं स्त्रीरूपं विषमयं, विषयाः विषभूताः, रागाधिकरणभूताः पुत्रकलत्रादयः नश्वराः इति न क्वापि रागो मोहो द्वेषो वा विधेयः ।[2] सर्वा अपि सम्पदः नश्वराः इति तत्र मदो न प्रशस्यः[3] । ये जलतृणांकुरसंयुक्तां वनस्थलीं प्राप्यैव परितुष्टाः भवन्ति, त एव यथार्थतः धीराः ।[4] ये जनाः सार्वभौमभवनभूतं निवासयोग्यं वनम् अयत्नलभ्यं फलमूलादिभोजनं च विहाय विषयेन्द्रियचौरैः मुष्यमाणाः गृहेषु वसन्ति, नूनं ते बालाः बालिशाश्च ।[5] अतः विघ्नकृत् पुत्रदारादिसंसारः आशापाशश्च हेयः ।[6]

'कर्त्तव्योपदेश' नामके तृतीये परिच्छेदे षट्विंशतिपद्यानि सन्ति । अत्र देहः भवच्छेदाय प्राप्तः, यावदयं व्याधिजरामृत्युभिर्नापह्रियते तावत् प्रतिक्षणं जाग्रता सता पुरुषेण भवाब्धिं तर्त्तुं प्रयत्नो विधेयः[7] । अत्र जगति यदि कदाचित् कश्चित् शब्दैः मनो व्यथयति, तत्र रोषो न विधेयः । यतः स पुरुषः स्वयं चारित्रतः स्खलन्नपि मां निर्दोषं विधातुमेव प्रयतते इति स क्षन्तव्य एव[8] । अयं संसारः दुःखांगारकतप्तः महानस इवास्ति अत्र विषयामिषेषु मानसमार्जारस्य पतनं विनाशकरमेव[9] । यदि चित्तरूपी मत्स्यो यौवनजलसंकुले युवतिजलधौ अवतरति मनोभूःकैवर्तः तं नूनं बद्ध्वा निगडे क्षेप्स्यति[10] इत्यादीनि बहुविधानि वैराग्यकराणि वचांस्यत्र निबद्धानि सन्ति, यानि विषयजालसमन्वितात् जगत्कान्तारात् मानसमृगमवरुध्योपशमादिफलसमन्विते तत्त्वज्ञानादियवांकुरविपुले ब्रह्मणि विश्रमयितुं प्रेरयितुमलम् ।

ब्रह्मप्राप्तिनामके परिच्छेदे चतुर्विंशतिपद्यानि सन्ति । तत्र प्रायशः सर्वेष्वपि पद्येषु श्रियः न निर्वृतिप्रदाः, ताभिरपि तावती एव तृप्तिः यावती अयत्नसुलभैः फलमूलैर्भवति । श्रियः प्राप्त्यै रक्षायै महान् प्रयत्नो विधेयो भवति । फलमूलादीनि च अयत्नसुलभानि इति एतान्येव

---

१. श्लोक २७ ।
२. श्लोक ३१, ३२, ३३, ३४, ३५, ३९ ।
३. श्लोक ४०, ४१ ।
४. श्लोक ४२, ४३, ४४, ४५, ४९ ।
५. श्लोक ५०, ५१, ५४ ।
६. श्लोक ५५, ५६ ।
७. श्लोक ५७, ५८, ५९, ६० ।
८. श्लोक ६६, ६७ ।
९. श्लोक ७ ।
१०. श्लोक ७३ ।

प्राप्य नरेण सन्तुष्टेन भाव्यम्, सर्वथा च विषयेभ्यो मनः निरुद्ध्य परमानन्दसन्दोहस्रोतोभूतं ब्रह्म समुपास्यम् । तत्त्वविदः योगीश्वराः आशातृष्णारागद्वेषमोहादीन् हात्वा तमेव समुपासते ।

शान्तिशतके उद्धृता कवयः काव्यानि च

अत्र शान्तिशतके बहूनि पद्यानि भर्तृहरिकृतात् वैराग्यशतकात् उद्धृतानि, अनेकानि पद्यानि च हर्षदेव - शालिवाहन - शूल - श्रीधरदास - विद्याकर - वल्लभदेव (बल्लाल) कृष्णमिश्र - नग्नाचार्य - लक्ष्मीधर - गुणाकरभद्र - धर्मकीर्ति - सत्यबोधप्रभृतीनामपि समुद्धृतानि सन्ति ।

शिल्हणस्य स्थितिकालः

काश्मीरेषु कविषु कल्हण - जल्हण - बिल्हणप्रभृतयः सुविदिताः सन्ति । तत्सदृशं नाम वहन् शिल्हणोऽपि काश्मीरदेशोद्भवः इति वक्तुं शक्यते[1] । विन्टरनित्जमतानुसारमयं काश्मीरः सन्नपि बंगदेशे निवसन् साहित्यसाधनां व्यदधात्[2] । एतस्य नाम विषये क्वचिद् वैमत्यं दृश्यते यथा पिशलमहाभागा बिल्हण इति स्वीकरोति, स्टेनबॉकविन्टरनित्जमहोदयावपि अमुं प्रश्नं विचारयतः । परमस्य यथार्थं नाम शिल्हण इत्येव । यतः स शान्तिशतके द्वितीये पद्ये स्वयमेव आत्मानं शिल्हण इति निर्दिशति । क्वचिन्मातृकासु लिपिदोषात् सिल्हण, सिहनलण, शिल्हन इत्याद्यपि दृश्यते ।[3]

एतस्य स्थितिकालविषये किमपि व्यवस्थितं प्रमाणं नोपलभ्यते । अस्य शान्तिशतके भर्तृहरिकृतस्य (६०० ई० पू०) वैराग्यशतकस्य अनेके श्लोकाः उद्धृता इति नूनं भर्तृहरेरर्वाचीनः । विद्याकरकृते सुभाषितरत्नकोषे (११३० ई० पू०), श्रीधरदासकृते सदुक्तिकर्णामृते (१२०५ ई० पू०) शिल्हणकृतात् शान्तिशतकात् कतिपयानि पद्यानि उद्धृतानि दृश्यन्ते । तेनेदं वक्तुं शक्यते यदयमेतेभ्योः प्राचीनः इति नूनमस्य समयः त्रयोदशशतकात् पूर्वं भाव्यः[4] ।

---

१. म० सु० सं० पृ० ३६७, क्ला० सं० लि० पृ० १९५, कटूसं० पू० ९३ हि० आ० क्ला० सं० लि० ।

२. एच० ओ० इ० लि० पृ० १६२ ।

३. एच० ओ० इ० लि० पृ० १६२ सु० र० को० पृ० सी० सीं० १०५, म० सु० सं० पृ० ३६७ ।

४. सं० सा० सं० इति० पृ० ८१३, म० सु० सं० ३६७, क्ला० सं० लि० १९५ कम्पै० टू० सं० पृ० ९३ ।

शिल्हणस्य व्यक्तित्वं कृतित्वं च

शिल्हणस्य शान्तिशतकादतिरिक्ता कापि कृतिः क्वचिदपि संग्रहालयेषु नोपलब्धा। केवलमिदं एकमेव शान्तिशतकं नाम संग्रहभूतं पुस्तकं शिल्हणस्य कृतितया विद्वद्भिः स्वीक्रियते। शिल्हणस्य स्थितिकालादिविषये किमपि वक्तुं यथा सुदुष्करमस्ति न तथा तस्य व्यक्तित्वविषये। यतो ह्यस्य शान्तिशतकं मुकुरमिव तस्य व्यक्तित्वं सम्यगवभासयति।

शान्तिशतके चतुर्षु परिच्छेदेषु संकलितैः पद्यैरिदं वक्तुं शक्यते यत् शिल्हणो विद्याविवेकसम्पन्नः तत्त्वविद् बभूव। भगवान् शिवोऽस्य परमाराध्यदेव आसीदत एव शान्तिशतके संगृहीते भर्तृहरिकृतेऽपि पद्ये विष्णुपदस्य स्थाने शिववाचकः शब्दोऽनेकधा प्रयुक्तः।

विषया अस्य मनो हर्तुं न कदापि प्राभवन्। रूपयौवनसम्पन्नानि कलत्राणि तं मोहपाशे बद्धुं नाशक्नुवन्। रागद्वेषादिसमन्वितं जगत् विपज्जालमिव मन्वानः सोऽअमुं भवाब्धिं तर्तुमनिशं प्रावर्तत। सः सर्वविधमपि लौकिकं सुखं निष्फलमिव स्वीकुर्वन् सर्वानन्दनिधानभूते ब्रह्मणि एव निर्वृतिमन्वभवत्। संक्षेपतोऽयं ब्रह्मविद् वैराग्यसम्पन्नः योगिराडिव जीवन्मुक्तोऽराजत।

शिल्हणकृता काचिदपरा कृतिः नोपलभ्यते इति पूर्वमवोचाम। अत्र शान्तिशतकेऽपि भर्तृहरिकृता अनेके श्लोकाः संकलिताः इत्यप्युक्तम्। परमत्रेदमवधेयं यद् भर्तृहरेः वैराग्यशतकात् उद्धृतेषु पद्येष्वपि क्वचित् पदपरिवर्तनं कृतमस्ति। येन तस्य विष्णुभक्तत्वेन सह कवित्वप्रतिभाऽपि सुव्यक्ता भवति। एतादृशेषु स्थलेषु एव न केवलं काव्यसौष्ठवं परं स्वरचितेषु पद्येष्वपि भर्तृहरिपद्यापेक्षया शब्दसौष्ठवं भावगाम्भीर्यं च विशिष्य समुपलभ्यते। अपि चात्र शान्तिशतके वैराग्यप्रसंगे बौद्धधर्मस्यापि प्रभावः परिलक्षितो भवति।

शान्तिशतकस्य मातृकाः

शोधप्रबन्धभूतस्य ग्रन्थास्यास्य सम्पादनकर्मणि परिज्ञातानां प्रयुक्तानां मातृकाणां च विवरणमधो निर्दिष्टम्—

(क) गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठे संगृहीता

मातृकासंख्या ९१३३।७७, नाम-शान्तिशतकम् लेखक नाम-शिल्हणः, विषयः काव्यम्, पत्रसंख्या १-१५, आकारः ३८″×५″ ५, प्रतिपृष्ठं पंक्तिसंख्या ५, प्रतिपंक्ति वर्णसंख्या ९२, लिपिः मैथिली, आधारः कागजः विवरणं पूर्णः, स्थितिः सुस्था, लिपिकालः शक १७२४।

आरम्भः—

ॐ नमो गणेशाय
नमस्यामो देवान्ननुहतविधेस्तेऽपि वशगाः
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ।
फलं कर्मायत्तं किमहमव (मर ?) गणैः किं च विधिना
नमस्तत् कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥१॥

पुष्पिका

इति शान्तिशतके विवेकोदयो नाम द्वितीयः परिच्छेदः ।

समाप्तिः

आशा नाम नदी मनोरथजला तृष्णातरंगाकुला
रागद्वेषमयी वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहावर्तसुदुस्तरातिगहना प्रोत्तुंगचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥१०६॥

इति श्रीमहामहोपाध्यायश्रीशिल्हणकृतं शान्तिशतकं समाप्तम् ।

शकाब्दा १७२४ श्री ईश्वरचन्द्रदेवशर्मणः पुस्तकमिदं स्वाक्षरं च ।

(ख) गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठे संगृहीता

मातृकासंख्या ६१३२।७६, विषयः काव्यम्, नाम शान्तिशतकम्, लेखकः शिल्हणः मिश्रः, पत्रसंख्या—१—८, आकारः ४३′×५×६.६, प्रतिपृष्ठे पंक्तिसंख्या ४, प्रतिपंक्ति अक्षरसंख्या ६४, लिपिः मैथिली, आधारः का० विवरणं अपूर्णं, द्वितीयपरिच्छेदपर्यन्तं समुपलभ्यते । स्थितिः खण्डिता ।

आरम्भः—पत्र १ ख

नमस्यामो देवान्ननु हन्त (त) विधेस्तेऽपि वस(श)गाः
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ।
फलं कर्मायत्तं किममव(र)गणैः किञ्च विधिना
नमस्तत् कर्मभ्यो विधिरपि न येभ्यः प्रभवति ।

पुष्पिका

पत्र—५ ख—इति शान्तिशतके परितापोपशम नाम प्रथमः परिच्छेदः समाप्तः ।

शिल्हणस्य व्यक्तित्वं कृतित्वं च

शिल्हणस्य शान्तिशतकादतिरिक्ता कापि कृतिः क्वचिदपि संग्रहालयेषु नोपलब्धा। केवलमिदं एकमेव शान्तिशतकं नाम संग्रहभूतं पुस्तकं शिल्हणस्य कृतितया विद्वद्भिः स्वीक्रियते। शिल्हणस्य स्थितिकालादिविषये किमपि वक्तुं यथा सुदुष्करमस्ति न तथा तस्य व्यक्तित्वविषये। यतो ह्यस्य शान्तिशतकं मुकुरमिव तस्य व्यक्तित्वं सम्यगवभासयति।

शान्तिशतके चतुर्षु परिच्छेदेषु संकलितैः पद्यैरिदं वक्तुं शक्यते यत् शिल्हणो विद्याविवेकसम्पन्नः तत्त्वविद् बभूव। भगवान् शिवोऽस्य परमाराध्यदेव आसीदत एव शान्तिशतके संगृहीते भर्तृहरिकृतेऽपि पद्ये विष्णुपदस्य स्थाने शिववाचकः शब्दोऽनेकधा प्रयुक्तः।

विषया अस्य मनो हर्तुं न कदापि प्राभवन्। रूपयौवनसम्पन्नानि कलत्राणि तं मोहपाशे बद्धुं नाशक्नुवन्। रागद्वेषादिसमन्वितं जगत् विपज्जालमिव मन्वानः सोऽमुं भवाब्धिं तर्तुमनिशं प्रावर्तत। सः सर्वविधमपि लौकिकं सुखं निष्फलमिव स्वीकुर्वन् सर्वानन्दनिधानभूते ब्रह्मणि एव निर्वृतिमन्वभवत्। संक्षेपतोऽयं ब्रह्मविद् वैराग्यसम्पन्नः योगिराडिव जीवन्मुक्तोऽराजत।

शिल्हणकृता काचिदपरा कृतिः नोपलभ्यते इति पूर्वमवोचाम। अत्र शान्तिशतकेऽपि भर्तृहरिकृता अनेके श्लोकाः संकलिताः इत्यप्युक्तम्। परमत्रेदमवधेयं यद् भर्तृहरेः वैराग्यशतकात् उद्धृतेषु पद्येष्वपि क्वचित् पदपरिवर्तनं कृतमस्ति। येन तस्य विष्णुभक्तत्वेन सह कवित्वप्रतिभाऽपि सुव्यक्ता भवति। एतादृशेषु स्थलेषु एव न केवलं काव्यसौष्ठवं परं स्वरचितेषु पद्येष्वपि भर्तृहरिपद्यापेक्षया शब्दसौष्ठवं भावगाम्भीर्यं च विशिष्य समुपलभ्यते। अपि चात्र शान्तिशतके वैराग्यप्रसंगे बौद्धधर्मस्यापि प्रभावः परिलक्षितो भवति।

शान्तिशतकस्य मातृकाः

शोधप्रबन्धभूतस्य ग्रन्थास्यास्य सम्पादनकर्मणि परिज्ञातानां प्रयुक्तानां मातृकाणां च विवरणमधो निर्दिष्टम्—

(क) गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठे संगृहीता

मातृकासंख्या ६१३३।७७, नाम-शान्तिशतकम् लेखक नाम-शिल्हणः, विषयः काव्यम्, पत्रसंख्या १-१५, आकारः ३८"×५" ५, प्रतिपृष्ठं पंक्तिसंख्या ५, प्रतिपंक्ति वर्णसंख्या ६२, लिपिः मैथिली, आधारः कागजः विवरणं पूर्णः, स्थितिः सुस्था, लिपिकालः शक १७२४।

आरम्भः—

ॐ नमो गणेशाय
नमस्यामो देवान्ननुहतविधेस्तेऽपि वशगाः
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ।
फलं कर्मायत्तं किमहमव (मर ?) गणैः किं च विधिना
नमस्तत् कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥१॥

पुष्पिका

इति शान्तिशतके विवेकोदयो नाम द्वितीयः परिच्छेदः ।

समाप्तिः

आशा नाम नदी मनोरथजला तृष्णातरंगाकुला
रागद्वेषमयी वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहावर्तसुदुस्तरातिगहना प्रोत्तुंगचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥१०६॥

इति श्रीमहामहोपाध्यायश्रीशिल्हणकृतं शान्तिशतकं समाप्तम् ।

शकाब्दा १७२४ श्री ईश्वरचन्द्रदेवशर्मणः पुस्तकमिदं स्वाक्षरं च ।

(ख) गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठे संगृहीता

मातृकासंख्या ९१३२।७६, विषयः काव्यम्, नाम शान्तिशतकम्, लेखकः शिल्हणः मिश्रः, पत्रसंख्या—१—८, आकारः ४३′×५×९.६, प्रतिपृष्ठे पंक्तिसंख्या ४, प्रतिपंक्ति अक्षरसंख्या ६४, लिपिः मैथिली, आधारः का० विवरणं अपूर्णं, द्वितीयपरिच्छेदपर्यन्तं समुपलभ्यते । स्थितिः खण्डिता ।

आरम्भः—पत्र १ ख

नमस्यामो देवान्ननु हन्त (त) विधेस्तेऽपि वस(श)गाः
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ।
फलं कर्मायत्तं किममव(र)गणैः किञ्च विधिना
नमस्तत् कर्मभ्यो विधिरपि न येभ्यः प्रभवति ।

पुष्पिका

पत्र—५ ख—इति शान्तिशतके परितापोपशम नाम प्रथमः परिच्छेदः समाप्तः ।

समाप्तिः—पत्रसंख्या ८ ख

श्लोक ५३—स किं धर्मो यत्र स्फुरन्ति न परद्रोह....

(ग) गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठे संगृहीता

मातृकासंख्या २७५९।३७, विषयः काव्यम्, नाम—शान्तिशतकम्। कविः शिल्हणः, पत्रसंख्या १—११, आकारः ९. ६ × । ४. ३. प्रतिपृष्ठं पंक्तिसंख्या ६, प्रतिपंक्ति अक्षर-संख्या ६२, लिपिः मैथिली, आधारः कागजः, विवरणं पूर्णम्, स्थितिः सुस्था।

आरम्भः—

पत्रसंख्या १ अ

सन्तोषसन्ततिकरं विदुषां कवीनां
सांसारिकाप्रतिमदुःखविनाशबीजम्।
यत्नेन शान्तिशतकं विदधे विवेकी
श्री सिल्हणः प्रकृतिसुन्दरशुद्धवुद्धिः ॥१॥

पुष्पिका—

पत्रसंख्या ६ अ, श्लोकसंख्या ५२ ॥ इति शान्तिशतके विवेकोदयो नाम द्वितीयः परिच्छेदः।

समाप्ति :—

पत्रसंख्या ११

इतो न किंचित्परतो न किंचिद्
यतो यतो यामि ततो न किंचिद्।
विचार्यमाणं हि जगन्न किंचित्
निजप्रबोधादधिकं न किंचित् ॥१०५॥

इति शान्तिशतके पथोपदेशो नाम चतुर्थः परिच्छेदः।

समाप्तं शान्तिशतकम्।

(घ) गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठे संगृहीता

मातृकासंख्या ९१३४।७८, नाम—शान्तिशतकम्,

लेखकः—शिल्हणः, विषयः—काव्यम्, पत्रसंख्या २-१४, प्रथमं पद्यं नास्ति। आकारः ३३.७×५, प्रतिपृष्ठं पंक्तिसंख्या ५, प्रतिपंक्ति वर्णसंख्या ५२, विवरणम्—अपूर्णा।

आरम्भः पत्रसंख्या २ अ

विशीर्णः प्रारम्भो वपुरपि जराव्याधिविधुरं
गतं दूरे विप्रस्वजनभरणं वांछितमपि।
इदानीं व्यामोहादहह विपरीते हतविधौ (धौ)
विधेयं भक्तत्वं स्फुरति मम नाद्यापि हृदये ॥५॥

पुष्पिका—पत्रसंख्या ५ क

इति शान्तिशतके परितापो नाम प्रथमः परिच्छेदः।

समाप्तिः—पत्रसंख्या १४ ख

इति श्रीशान्तिशतके शिल्हणविरचिते चतुर्थः परिच्छेदः समाप्तः।

समाप्तोऽयं ग्रन्थः ॥

(ङ) गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठे संगृहीता

मातृकासंख्या—११४१५।१०३ नाम—शान्तिशतकम्, लेखकः शिल्हणः, विषयः काव्यम्, पत्रसंख्या १-३ आकारः ३२, ८, ५, प्रतिपृष्ठं पंक्तिसंख्या ५, प्रतिपंक्ति अक्षरसंख्या ४४, विवरणम्—अपूर्णा।

(च) वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनपुस्तकालये संगृहीता

मातृकासंख्या ०४०५२८, विषयः काव्यम्, ग्रन्थनाम—शान्तिशतकम्, ग्रन्थकारः शिल्हणः, आकारः १३×३×२.६, पत्रसंख्या १-१२, प्रतिपृष्ठं पंक्तिसंख्या—७, प्रतिपंक्ति अक्षरसंख्या ५६, लिपिः बंगीया, विवरणम्—अपूर्णा, अस्पष्टाक्षरम्।

आरम्भः— पत्रसंख्या १ ब

श्री गणेशाय नमः

नमस्यामो देवान्ननुहतविधेस्तेऽपि वस(श)गाः
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः
फलं कर्म्मायत्तं किममव(र)गणैः किंच विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यं(यः)प्रभवति ॥

समाप्तिः— पत्रसंख्या १२ ब अस्पष्टम् जीर्णम् ।

इदं शरीरं शत जर्जरं·····॥१०६॥ (श्लोकसंख्या)

इति शान्तिशतके चतुर्थः परिच्छेदः ।

(छ) वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनपुस्तकालये संगृहीता

मातृकासंख्या १५२०८, विषयः काव्यम्, ग्रन्थनाम-शान्तिशतकम्, ग्रन्थकारः शिल्हश:(णः), पत्रसंख्या १-५, आकारः १२, ४, ५ इंच प्रतिपृष्ठं पंक्तिसंख्या ११, प्रतिपंक्ति वर्णसंख्या ६६, लिपिः वंगीया, वित्ररणम्— अपूर्णा, जीर्णम् अस्पष्टाक्षरम् ।

आरम्भः— पत्रसंख्या १ ब

ॐ गणेशाय

नमस्यामो देवान्ननुहतविधेस्ते(ऽ)पि·····न येभ्यं(यः)प्रभवति ॥१॥

पुष्पिका— पत्रसंख्या ३ ब

इति शान्तिशतके विवेकोदयो नामो इति द्वितीयः परिच्छेदः ।

समाप्तिः— पत्रसंख्या ५ ब—अस्पष्टम् ।

(ज) वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनपुस्तकालये संगृहीता

मातृकासंख्या ४३३७५, विषयः काव्यम्, ग्रन्थनाम-शान्तिशतकम् । ग्रन्थकारः शिल्हणः, पत्रसंख्या १-३, आकारः ६, ६, ३, ६ आधारः का० लिपिः वंगीया, विवरणम्—अपूर्णा ।

पुष्पिका —

पत्रसंख्या ३ अ इति शान्तिशतकम् परितापोपशमन नाम प्रथमः परिच्छेदः ।

(झ) वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनपुस्तकालये संगृहीता

मातृकासंख्या ४३३८, ग्रन्थनाम-शान्तिशतकम्, ग्रन्थकारः शिल्हणः, पत्रसंख्या १-२, आकारः १४. ५ × ३. १, प्रतिपृष्ठं पंक्तिसंख्या ६, प्रतिपंक्ति अक्षरसंख्या ५३, लिपिः वंगीया, आधारः का० अपूर्णा ।

(त) वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनपुस्तकालये संगृहीता

मातृकासंख्या ४३४०१ ग्रन्थनाम-शान्तिशतकम्, ग्रन्थकारः शिल्हणः, पत्रसंख्या १-२, आकारः १७. २ × ३. ८ प्रतिपृष्ठं पंक्तिसंख्या ६, प्रतिपृष्ठं अक्षरसंख्या ५८, लिपिः वंगीया, विवरणम्—अपूर्णा ।

(थ) वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनपुस्तकालये संगृहीता

मातृकासंख्या ४३३७९, ग्रन्थनाम शान्तिशतकम्, ग्रन्थकारः शिल्हणः, पत्रसंख्या १३-१५, आकारः १३ × ५ × ३, प्रतिपृष्ठं पंक्तिसख्या ७, प्रतिपक्ति अक्षरसंख्या ५०, लिपिः वंगीया आधारः का० विवरणम्—अपूर्णा ।

(द) कलिकातास्थवंगालरायलएशियाटिकसोसाइटीनाम्नि संस्थाने संगृहीता

मातृकासंख्या ५५९२ ग्रन्थनाम शान्तिशतकम्, ग्रन्थकारः शिल्हणः, पत्रसंख्या ७, आकारः ११, १, ५, प्रतिपृष्ठं पंक्तिसंख्या ६, प्रतिपंक्ति अक्षरसंख्या १६-२२, लिपिः उडिया, विवरणम्—अपूर्णा, स्थितिः-सुस्था ।

(ध) कलिकातास्थवंगालरायलएशियाटिकसोसाइटीनाम्नि संस्थाने संगृहीता

मातृकासंख्या ५५५० ग्रन्थनाम शान्तिशतकम्, ग्रन्थकारः शिल्हणः, पत्रसंख्या ९, प्रतिपत्रं पंक्तिसंख्या ७, प्रतिपंक्ति अक्षरसंख्या—१६ × ३ × $\frac{3}{4}$ इंच, लिपिः बंगीया, विवरणम्—अपूर्णा, स्थितिः सुस्था ।

समाप्तिः—इति शिल्हणमिश्रकृते शान्तिशतके विवेकोदयो नाम चतुर्थः परिच्छेदः ।

(न) कलिकातास्थवंगालरायलएशियाटिकसोसाइटीनाम्नि संस्थाने संगृहीता

मातृकासंख्या १०८३२, ग्रन्थनाम शान्तिशतकम्, ग्रन्थकारः शिल्हणः, पत्रसंख्या १७, पंक्तिसंख्या ५, आकारः ११ × ३ इंच, लिपिः बंगीया, विवरणम्—अपूर्णा ।

समाप्तिः पुष्पिका—

इति शान्तिशतके शान्तिविवेको नाम—चतुर्थः खण्डः ।

(प) कलिकातास्थबंगालरायलएशियाटिकसोसाइटीनाम्नि संस्थाने संगृहीता

मातृकासंख्या ६६२३, ग्रन्थनाम शान्तिशतकम्, ग्रन्थकारः शिल्हणः, पत्रसंख्या ११, प्रतिपृष्ठं पंक्तिसंख्या ४, सम्पूर्णश्लोकसंख्या १, ८७, आकारः १२×६ इंच, लिपिः देवनागरी।

(फ) दरभंगानगरस्थे मिथिलाशोधसंस्थाने संगृहीता

शान्तिशतकम्, ग्रन्थकारः शिल्हणः, पत्रसंख्या ५, आकारः १५×५ इंच, प्रतिपृष्ठं पंक्तिसंख्या १०, प्रतिपंक्ति अक्षरसंख्या ७२, लिपिः मैथिली, आधारः का०, विवरणम्—पूर्णा स्थितिः सुस्था प्राचीना।

आरम्भः—

ओं नमः श्रीदुर्गादेव्यै नमः।
सन्तोषसन्ततिकरं विदुषां कवीनां
सांसारिकाप्रतिमदुःखविनाशबीजम्।
यत्नेन शान्तिशतकम् विदधे विवेकी
श्री सिल्हणः प्रकृतिसुन्दरशुद्धबुद्धिः ॥१॥

नमस्यामो देवान् ननु हतविधेस्ते(ऽ)पि वशगा
विधिर्वन्द्यस्सो(ऽ)पि प्रतिनियतकर्मैकफलदः
फलं कर्मायत्तं किममरगणैः किञ्च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥२॥

समाप्तिः—

आशा नाम नदी मनोरथजला तृष्णातरंगाकुला।
मोहावर्त्तसुदुस्तरा प्रज(क)टितप्रोत्तुंगचिन्तातटी
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी।
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥१०६॥
यदि शान्तौ मनो देयं यदि मुक्तिपदे रतिः।
तदा शिल्हणमिश्रस्य पादमारभतां धिया ॥

पुष्पिका—

इति शान्तिशतके चतुर्थः परिच्छेदः॥

समाप्तश्चेदं शान्तिशतकम्।

(व) दरभंगानगरस्थे मिथिलाशोधसंस्थाने संगृहीता

शान्तिशतकम्, ग्रन्थकारः शिल्हणः, पत्रसंख्या ४, प्रतिपृष्ठं पंक्तिसंख्या ८, प्रतिपंक्ति अक्षरसंख्या ५६, आकारः १३ × ½″, ३½ इंच, लिपिः—मैथिली, आधारः का० विवरणम्—अपूर्णा, स्थितिः सुस्था प्राचीना च ।

(भ) दरभंगानगरस्थे मिथिलाशोधसंस्थाने संगृहीता

शान्तिशतकम्, ग्रन्थकारः शिल्हणः, पत्रसंख्या ११, प्रतिपृष्ठं पंक्तिसंख्या ६, प्रतिपंक्ति अक्षरसंख्या ६०, आकारः १७½ × ३¾ विवरणम्—स्थितिः प्राचीना, अपूर्णा, सन् १२४६, शक १७६१ ।

(म) 'अरैल'(प्रयाग)स्थश्रीसच्चा-आश्रमे विष्णुब्रह्मचारिणः संग्रहे संगृहीता

ग्रन्थनाम शान्तिशतकम्, लेखकः शिल्हणः, पत्रसंख्या १६, आकारः ७½″ × १२″ पृष्ठसंख्या १६, प्रतिपृष्ठं पंक्तिसंख्या २३ प्रतिपंक्ति वर्णसंख्या १८, सम्पूर्णा श्लोकसंख्या २६ + २८ + २४ + २६, लिपिः देवनागरी, स्थितिः सुस्था नवीना । (अस्या मातृकायाः पाठभेदाः मूलसंपादनानन्तरं पुनरीक्षिकया समावेशिताः)

आरम्भः

नमस्यामो देवान्ननु हतविधेस्ते(ऽ)पि वशगा
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ।
फलं कर्मायत्तं किममरगणैः किं च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ।।

पुष्पिकाः

(१) इति श्रीशान्तिशतके परितापोपशमो नाम प्रथमः परिच्छेदः ।

(२) इति शान्तिशतके विवेकोदयो नाम द्वितीयः परिच्छेदः ।

(३) इति श्रीशान्तिशतके कर्त्तव्यतोपदेशो नाम तृतीयः परिच्छेदः ।

(४) इति श्रीशिल्हनकविकृतं शान्तिशतकं समाप्तम् ।

समाप्तिः

आशानाम नदी मनोरथजला तृष्णातरङ्गाकुला
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहावर्त्तसुदुस्तरा प्रकटितप्रोत्तुंगचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ।।

शान्तिशतकस्य इयं प्रस्तुतिरष्टमातृका आश्रित्य कृतास्ति । तासां संक्षिप्तं विवरणमित्थम्—

क. ख. ग. घ. ङ, च. छ. म.

एतदतिरिक्ता तिस्रः मातृकाः दरभंगानगरस्थे मिथिलाशोधसंस्थाने चतस्रः कलिकातास्थएसियाटिकसोसाइटीपुस्तकालये संगृहीता सन्ति । इमाः मातृकाः महता प्रयत्नेनापि द्रष्टुं नाशक्यन्त ।

ऑफ्रेख्ट कृते सूचीवन्धे (Catalogus Catalogorum) अन्येषु च ऐतिह्यग्रन्थेषु ग्रन्थास्यास्य मुद्रणविषयेऽपि सूचना समुपलभ्यते ।[1] परं अस्य[2] कापि मुद्रिता प्रतिः मया द्रष्टुं नापारि ।

उपसंहारः

यद्यपि कस्यामपि भाषायां निबद्धस्य वाङ्मयस्य सर्वासामपि शाखानां स्वकीयं महत्त्वं भवति, परन्तु सुभाषितानां तत्र विशिष्य महत्त्वं भवति । वाङ्मयस्य अन्याः सर्वा अपि शाखाः मानवजीवनस्य किमप्येकैकमभावं पूरयन्ति, परं ताः मानवजीवनस्य सर्वाभ्यो दिग्भ्यः निर्माणार्थं अभावपूर्त्यै वा न प्रभवन्ति । वेदाः धर्मशास्त्राणि यद्यपि जीवनं सर्वतः नियमयन्ति, भवन्ति महत्त्वपूर्णानि, तथापि तेषां दुर्बोधतया, अनेकेषां तत्र अनधिकारतया च, न ते प्रभवन्ति सर्वानपि स्वस्वकर्मणि प्रवर्तयितुम् । अपि च तानि प्रभुसम्मितोपदेशतया न भवन्ति हृदयावर्जकानि इति कोमलमतयः तानि अध्येतुमपि न प्रवर्तन्ते । सुभाषितानि तु गुडजिह्विकया कर्तव्यपथं निर्दिशमानानि अनेकधा आत्मप्रतिविम्बमिव उपस्थापयितुं प्रवृत्तानि सर्वानपि जनान् स्वस्वकर्मणि प्रवर्तयितुं अपथेभ्यो निवर्तयितुं प्रभवन्त्येषु च कर्मसु प्रवर्तने सहायभूतानि, मानवं मानवं विधातुं सर्वा अपि च तस्य चेष्टाः सफलयितुं सुतरां प्रभवन्ति ।

शिल्हणकृतं शान्तिशतकं च अमुं उद्देश्यमेव अधिकृत्य विरचितम् । मन्ये ग्रन्थरत्नस्यास्य समुपस्थापनं प्रकाशनं च न केवलं मादृशां समेषामपि पाठकानां पुरुषार्थचतुष्टयसम्पादनाय प्रभवेत् तथापि कालिदासीयैः शब्दैः—

आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानाम् आत्मन्यप्रत्ययं चेतः ॥

(अ० शा० १. २)

---

१ ए० न्यू० हि०, पृष्ठ १०२ (Santisataka, ed. by K. Schönfeld, Leipzig १९१०), म० सु० सं०, पृष्ठ cxiv, आफ्रेख्ट कैटा०, भाग १, पृष्ठ ६४१ । हि० आफ क्ला०, पृष्ठ ३१८, ए० न्यू० हि०, पृ० १०२ ।

२. मुद्रणात् प्राक् एतद्ग्रन्थं पुनरीक्षमाणया मया १८७४ तमे ईशवीये वर्षे कलिकातानगर्यां 'ज्ञानरत्नाकर'मुद्रणालयात् प्रकाशिते "काव्यसंग्रह" नाम्नि ग्रन्थे संकलितः शान्तिशतकस्य पाठः अवलोकितः तस्य पाठभेदाश्चात्र समावेशिताः (डा० माया मालवीय) ।

शिल्हणकृतं शान्तिशतकम्

शान्तिशतकम्

प्रथमः परिच्छेदः

1 नमस्यामो देवान् ननु हतविधेस्तेऽपि वशगा
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः[1]।
फलं कर्मायत्तं किममर[2]गणैः किञ्च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः[3] प्रभवति[4] ॥१॥

2 सन्तोषसन्ततिकरं विदुषां कवीनां
सांसारिकाप्रतिमदुःखविनाशबीजम् ।
यत्नेन शान्तिशतकं विदधे विवेकी
श्रीशिल्हणः[1] प्रकृतिसुन्दरशुद्धबुद्धिः[2] ॥२॥

3 आत्मज्ञानविवेकनिर्मलधियः कुर्वन्त्यहो दुष्करं
यन्मुञ्चन्त्युपभोगभाञ्ज्यपि धनान्येकान्ततो निस्पृहाः ।
न प्राप्तानि पुरा न सम्प्रति न च प्राप्तौ दृढप्रत्ययो
वाञ्छामात्र[1]परिग्रहाण्यपि वयं त्यक्तुं न तानि क्षमाः ॥३॥

4 धन्यानां गिरिकन्दरोदरभुवि[1] ज्योतिः परं ध्यायता-
मानन्दाश्रुजलं पिबन्ति शकुना निःशङ्कमङ्क[2]स्थिताः ।
अस्माकं तु मनोरथोपरचितप्रासादवापीतट-
क्रीडाकाननकेलिमण्डप[3]जुषामायुः[4] परं क्षीयते ॥४॥

---

1 (१) फलदम् ग । (२) किममव ख । (३) येभ्यं क । (४) म एतदनन्तरं पद्यमिदं लिखति—
यदि शान्तौ मनो देयं यदा मुक्तिपदे रतिः ।
तदा शिह्लनमिश्रस्य पदमारभ्यतां धिया ॥२॥

2 (१) सिहलण ख ।

3 (१) वाङ्मात्रेण क ख ग ।

4 (१) दरोदरगत क, कन्दरे निवसतां वै० (२) मङ्के क ख ग घ, वै० मङ्गे शयाः (३) मन्दिर-सदुक्ति, (४) सदामायुः सु० र० भा०, जुषां चेतः सदुक्ति ।

१

सर्व सुख देने वाले देवताओं को नमस्कार है। किन्तु देवता तो विधाता के अधीन है, तो विधाता ही वन्दनीय है, पर वह विधाता भी तो नियमित रूप से कृत कर्मों के अनुसार ही फल देने वाला है। इस प्रकार फल भी कर्मों के अधीन है। अतः देवताओं से या विधाता से क्या प्रयोजन है, उन कर्मों को ही नमस्कार है विधाता भी जिनके समक्ष कुछ नहीं कर पाता।

२

विवेकी (ज्ञानी) प्रकृति से सुन्दर शुद्धबुद्धि, श्री शिल्हण ने विद्वानों और कवियों को सन्तोष का समूह (सन्तति) प्रदान करने वाले सांसारिक (संसार सम्बन्धी) अद्वितीय दुःख के विनाश के कारणभूत शान्तिशतक की यत्नपूर्वक रचना की है।

३

आत्मज्ञान और विवेक के कारण पवित्र बुद्धिवाले सज्जन यह कठोर कार्य करते हैं कि वे पूर्ण रूप से इच्छा-रहित होकर उपभोग के साधनभूत धन को त्याग देतें हैं, और हमें पहले धन नहीं प्राप्त था, इस समय है नहीं और न प्राप्ति के लिए स्थिर विचार ही है और फिर भी वाङ्मात्र से ही प्राप्त इन भौतिक साधनों को त्याग करने में हम समर्थ नहीं हैं।

४

पर्वत की गुफाओं में रहते हुए, परम ज्योति का ध्यान करते हुए वे धन्य हैं जिनके अंक में बैठे हुए पक्षीगण उन्हीं के आनन्दजनित अश्रुओं का निश्शंक होकर पान करते रहते हैं। किन्तु हमारी आयु तो केवल मनोरथ के भवन में बनी बावड़ी के तट पर स्थित क्रीडोद्यान में लीला करते हुए ही क्षीण होती जा रही है।

5 विशीर्णः प्रारम्भो वपुरपि जराव्याधिविधुरं
गतं दूरे विप्रस्त्रजनभरणं वाञ्छितमपि ।
इदानीं व्यामोहादहह विपरीते हतविधौ
विधेयं यत्तत्त्वं स्फुरति मम नाद्यापि हृदये ॥५॥

6 बीभत्सा[1] विषया जुगुप्सिततमः कायो वयो गत्वरं
प्रायो बन्धुभिरध्वनीव पथिकैर्योगो[2] वियोगावहः ।
हातव्योऽयमसार[3] एव[4] विरसः संसार इत्यादिकं
सर्वस्यैव हि वाचि चेतसि पुनः[5] कस्यापि पुण्यात्मनः[6] ॥६॥

7 अजानन्दाहार्त्तिं विशति[1] शलभो दीपदहने
न मीनोऽपि ज्ञात्वा[2] धृतबडिशमश्नाति पिशितम् ।
विजानन्तोऽप्येतान्[3] वयमिह विपज्जालजटिला-
न्न मुञ्चामः कामानहह[4] गहनो मोहमहिमा ॥७॥

8 बीभत्साः प्रतिभान्ति किन्तु विषयाः किंतु[1] स्पृहायुष्मती
देहस्यापचयो मतौ निविशते गाढो गृहेषु ग्रहः ।
ब्रह्मोपास्यमिति स्फुरत्यपि हृदि व्यावर्तिका वासना
का नामेयमतर्क्य[2]हेतुगहना दैवी सतां यातना ॥८॥

---

6 (१) म मातृकायां श्लोकसंख्या २०, (२) पथिकैः संगो (सु० र० को०), योगे म (३) अयमसंस्तवाय (सु० र० को०), (४) एव (सदुक्ति) विसरः (सु० र० को०), (५) परं ग, (६) पद विपर्यय—कस्यापि पुण्यात्मनः (सु० र० को०) ।

7 (१) माहात्म्यं पततु । वै० २८, (२) वृतं क, ख, ग, बडिश युत वै० २०, (३) विजानन्तोप्येते, वै० २०, प्येवं क, (४) ज्ञान क, ख ।

8 (१) किं न क, ख, किं नु (सदुक्ति), (२) सतर्क्यं क ; °मतर्क्यं मोहः (हेतु) ।

५

कार्य नष्ट हो गया है, शरीर भी जरा और व्याधि से पीड़ित है (गतिहीन है)। विप्र तथा अभीष्ट स्वजनों का पालन भी दूर चला गया है, अहो, दुष्ट विधाता के प्रतिकूल हो जाने पर इस समय व्यामोह के कारण जो करने योग्य तत्त्व है, वह आज भी मेरे हृदय में स्फुरित नहीं होता है।

६

'विषय अत्यन्त घृणास्पद (घृणा के योग्य) है, शरीर उसकी भी अपेक्षा घृणित है, आयु अस्थिर है, मार्ग में पथिकों के मिलन के समान बन्धुओं का संयोग भी वियोग को उत्पन्न करने वाला होता है। अतः सार रहित और रस रहित यह संसार त्याग करने योग्य है' इत्यादि भाव सभी के वाणी में ही आते हैं, हृदय में तो किसी पुण्यात्मा के ही होते हैं।

७

शलभ (पतंगा) दीप दाह की पीड़ा को न जानता हुआ दीप की अग्नि में प्रवेश करता है, मछली भी न जानती हुई बंसी में लगे हुए माँस का भक्षण करती है, किन्तु हम लोग विपत्ति के जाल के कारण जटिल कामनाओं को जानकर भी उन्हें नहीं त्यागते। अहो, मोह की महिमा कितनी गम्भीर है ?

८

विषय घृणास्पद प्रतीत होते हैं, फिर भी इनकी कामना निरन्तर दीर्घजीवी है, शरीर की क्षीणता मन में आती है, फिर भी उसके प्रति गहन आग्रह है। ब्रह्म उपासना योग्य है, ऐसा हृदय में उठते हुए भी वासनाएँ उसे रोक देती हैं, सज्जनों के लिए अकल्पनीय कारणों वाली यह दैवी यातना क्यों है ?

9 क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं[1] न सन्तोषतः
सोढा दुःसहशीतवात[2]तपनक्लेशा न तप्तं तपः ।
ध्यातं वित्तमहर्निशं न च पुनर्विष्णोः पदं शाश्वतं[3]
तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वञ्चितम्[4] ॥९॥

10 कृत्वा शस्त्रविभीषिकां कतिपयग्रामेषु दीनाः प्रजा
मथ्नन्तो[1] विटजल्पितैरुपहताः क्षोणीभुजस्ते किल ।
विद्वांसोऽपि वयं किल त्रिजगती[2]सर्गस्थितिव्यापदा-
मीशस्तत[3]परिचर्यया न गणितो यैरेष[4] नारायणः ॥१०॥

11 नाथे[1] श्रीपुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि सुरे[2] नारायणे तिष्ठति ।
यं कंचित्[3]पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूढा वराका वयम् ॥११॥

12 जन्मेदं व्यर्थ[1]तां नीतं भवभोगोपलिप्सया ।
काचमूल्येन विक्रीतो हन्त चिन्तामणिर्मया ॥१२॥

13 वक्त्रं मुग्ध निषेवसे[1] न धनिनां नैवापि[2] चाटूवालपो[3]
नैषां गर्वगिरः शृणोषि न पुरः[4] प्रत्याशया धावसि ।
काले बालतृणानि खादसि सुखं निद्रासि निद्रागमे,
तन्मे ब्रूहि कुरंग कुत्र भवता किन्नाम तप्तं तपः ॥१३॥

---

9 (१) व्यक्तं, (२) वातिशीत घ, (३) नियमित प्राणेन शंभो पदम् वै० १४, न, च, पुनस्तत्त्वान्तरं शाश्वतम् सु० र० को०, (४) वंचिताः क ।

10 (१) मत्यन्तो क, ख, ग, घ च, (२) त्रिजगतां क, ख, च, छ, (३) मीशस्तल्प ख, (४) चैरेवं ग, यैवेषु ख ।

11 (१) नाथो ख, (२) दातविष्णवे ख, (३) किंचित् ख ।

12 (१) वन्ध्यतां ख, ग, घ, म ।

13 (१) यद् वक्त्रं मुहुरीक्षसे म । यदुक्तं मुणुविक्षणसे क, ख । मुहुरिक्षणसे घ । मुहुरीक्षसे म, (२) ब्रूषे न, (३) चाटुमृषा क, ख, ग, घ, व, छ, चाटुं मृषा म, (४) पुनः ।

९

हमने दुःख तो सहे किन्तु सहनशीलतापूर्वक नहीं, विवश होकर गृहोचित सुखों का त्याग किया, किन्तु वह भी सन्तोषपूर्वक नहीं। दुःसह शीत, वात, अग्नि का कष्ट भी हमने सहा किन्तु तपश्चर्या नहीं की, दिन रात धन का ध्यान किया किन्तु विष्णु के शाश्वत पद का ध्यान नहीं किया, जिन-जिन कार्यों को मुनिजन करते हैं, वही हमने भी किया, किन्तु उनके विभिन्न फलों से हम वंचित ही रहे।

१०

धूर्त जनों के कहने से शस्त्र का भय दिखाकर कुछ ग्रामों में दीन प्रजाओं का मंथन करते हुए वे राजा लोग नष्ट हो गए, किन्तु हम लोग वे विद्वान हैं, जिनके द्वारा तीनों भुवनों की उत्पत्ति, स्थिति तथा संहार करने में समर्थ नारायण की उपासना नहीं की गयी, अर्थात् हम लोग भी उन्हीं राजाओं की तरह नष्ट हो गए।

११

तीनों संसार के एकमात्र स्वामी, पुरुषोत्तम, मन के द्वारा उपासना करने योग्य और अपना पद भी प्रदान करने वाले पूज्य देव नारायण स्वरूप स्वामी के रहते हुए, कुछ ग्राम के स्वामी, अल्प धन देने वाले जिस किसी पुरुषाधम को हम सेवा के लिए खोजते हैं, निश्चय ही हम महामूर्ख हैं।

१२

सांसारिक भोगों की कामना में हमने अपना जन्म निरर्थक गँवा दिया। निश्चय ही हमने चिन्तामणि को काँच के मूल्य में बेंच डाला।

१३

हे भोले मृग, तुम न धनियों का मुख देखते हो, न उनकी झूठी खुशामद करते हो, न ही उनकी अहंकार युक्त वाणी सुनते हो, और न आशा के वशीभूत होकर उनके सामने दौड़ते हो, समय पर कोमल तृणों का भक्षण करते हो, निद्रा आने पर सुखपूर्वक सोते हो। हे कुरंग मुझसे कहो, तुमने कहाँ पर कौन सी तपस्या की थी।

14 वासः[1] शून्यमयत्नलभ्यमशनं वायुः कृतो वेधसा
व्यालानां पशव[2]स्तृणांकुरभुजः सुस्थस्थ[3]लीशायिनः ।
संसारार्णव[4]लंघनक्षमधियां वृत्तिर्ह[5]ता सा नृणाम्
यामन्वेषयतां प्रयान्ति सततं सर्वे समाप्तिं गुणाः ॥१४॥

15 कामं वनेषु[1] हरिणास्तृणेन जीवन्त्ययत्नसुलभेन ।
विदधति धनिषु न दैन्यं ते किल[2] पशवो वयं सुधियः ॥१५॥

16 आस्वाद्य स्वयमेव वच्मि महतीर्मर्मच्छिदो[1] वेदना
मा भूत्कस्यचिदप्ययं परिभवो याच्ञेति संसारिणः ।
पश्य भ्रातरियं हि यौवनजराधिक्कारकेलिस्थली
मानम्लानिमसी[2] गुणव्यतिकरप्रागल्भ्यगर्वच्युतिः[3] ॥१६॥

17 क्व गन्तासि भ्रातः, कृतवसतयो यत्र धनिनः
किमर्थं प्राणानां स्थितिमनुविधातुं कथमपि ।
धनैर्याच्ञालब्धैर्ननु परिभवोऽभ्यर्थनफलं
निकारोऽग्रे पश्चाद्[1]धनमहह भोस्तद्धि निधनम् ॥१७॥

18 प्राणानां बत किं ब्रुवे कठिनतां[1] तैरेव साविष्कृता[2]
निष्क्रामन्ति कदाचिदेव[3] हि न[4] ये याच्ञावचोभिः समम् ।
आत्मानं पुनराक्षिपामि विदित[5]स्थैर्योऽपि[6] येषामहो
मिथ्याशंकिततद्वियोगविधुरो[7] यत्प्रार्थये सर्वशः ॥१८॥

---

14 (१) यज्ञो क, च, छ, ख, घ, हिंसा वै० ११ याच्ञा शून्या ग, शून्यं म (२) हरिणाः ख, (३) स्वस्थाः म, (४) संसारार्ते क। (५) कृता म।

15 (१) बलेषु च, छ, पुलेपु ख। (२) खलु म०।

16 (१) महतीमर्म क, ख, ग, घ, च, (२) मानम्लानमसी क, ख, घ, च, छ, (३) गर्वक्षतिः क, घ, गर्वक्षिति ख, गर्भच्युति (सु० र० को)।

17 (१) पश्चात्कुलं क।

18 (१) काचनता क, ख, (२) माविष्कृता म, (३) कथञ्चिदेव म०। (४) नहि ख, (५) विहित ख, घ, (६) धैर्योऽपि ख, (७) मधुरो म।

१४

ब्रह्मा ने सर्पों के लिए बिना प्रयास के ही प्राप्त सुनसान स्थान (शून्य) को निवास तथा वायु को भोजन बनाया, पशु भी बिना प्रयत्न से प्राप्त तृणांकुर खाते हैं तथा समतल भूमि पर सोते हैं, किन्तु संसार रूपी सागर को पार करने में समर्थ बुद्धि वाले मनुष्यों की यह अनायास लभ्य जीविका छीन ली, जिस जीविका को निरन्तर खोजते हुए उनके सभी गुण समाप्त हो जाते हैं।

१५

जो हिरण स्वच्छन्दतापूर्वक वन में अत्यन्त सुलभ तृण से जीवन व्यतीत करते हैं तथा धनी लोगों के पास दैन्य प्रगट नहीं करते वे पशु हैं और हम बुद्धिमान् हैं ? (अर्थात् वास्तव में हम लोग ही पशु हैं, तथा वे ही बुद्धिमान् हैं)।

१६

अतिशय मर्म भेदी वेदनाओं का स्वयं अनुभव करके मैं कह रहा हूँ कि किसी सांसारिक प्राणी को कभी भी याचना रूपी परिभव न प्राप्त हो। हे भाई ! देखो न ! यह गौरवरूपी वृद्धत्व का धिक्कार करने वाली क्रीड़ा भूमि है, मान को समाप्त करने वाली कालिमा है तथा गुणों की प्रगल्भता को समाप्त करने वाली गर्वहानि है।

१७

प्रथम-भाई, कहाँ जा रहे हो ? द्वितीय-जहाँ धनी लोग निवास करते हैं। प्रथम-किसलिये ? द्वितीय—किसी प्रकार जीविका प्राप्त करने के लिए। प्रथम-याचना से प्राप्त धन से तो अपमान होता है। द्वितीय-अभ्यर्थना का फल प्रारम्भ में तिरस्कार तथा बाद में धन की प्राप्ति है। प्रथम-अहो। वही तो निधन है।

१८

प्राणों की कठिनता को क्या कहूँ ? यह कठिनता तो उन्होंने ही प्रकट की है। वे याचना-वचनों के साथ कभी नहीं निकलते। शिकायत की बात तो हमारी है कि उनकी स्थिरता को जानते हुए भी उनके वियोग की मिथ्या आशङ्का से दुखी होकर उनकी स्थिरता के लिए बारम्बार सभी देवताओं से प्रार्थना करता हूँ।

19 अमीषां प्राणानां तुलि[1]तविसिनीपत्रपयसां
कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितम्।
यदीशानामग्रे द्रविण[2]कणमोहान्धतमसां[3]
कृतं वीतव्रीडैर्निजगुणकथापातकमपि ॥१९॥

20 वीभत्साः प्रतिभान्ति किन्न विषयाः किं तु स्पृहायुष्मती
देहस्यापचयो मतौ[1] निविशते गाढो गृहेषु ग्रहः।
ब्रह्मोपास्यमिति स्फुरत्यपि हृदि व्यावर्त्तिका वासना
का नामेयमतर्क्यहेतुगहना दैवी सतां यातना ॥२०॥

21 तडिन्मालालोलं प्रतिविरति सक्ता[1]न्धतमसं
भवे सौख्यं[2] हित्वा शमसुखमुपादेयमनघम्[3]।
इति व्यक्तोद्गारं चटुलवचसः शून्यमनसो
वयं वीतव्रीडाः शुक इव पठामः परममी ॥२१॥

22 यदासौ दुर्वारः प्रसरति मदश्चित्तकरिण-
स्तदा तस्योद्दामप्रसररसरूढैर्व्यवसितैः।
क्व तद्धैर्यालानं[1] क्व च निज[2]कुलाचारनिगडः[3]
क्व सा लज्जारज्जुः क्व विनयकठोरांकुशमपि ॥२२॥

23 भिक्षाशनं भवनमायतनैकदेशः
शय्या भुवः परिजनो निजदेहभारः[1]।
वासश्च जीर्णपटखण्डनिबद्धकन्था[2]
हा हा तथापि विषयान्न जहाति चेतः ॥२३॥

---

19 (१) चलित क, (२) द्रविणमदनिःसंज्ञमनसां, (३) मनसां म्र।

20 (१) मती म।

21 (१) शक्तान्ध्र छ, दत्तान्धतमसं क, ख, ग. म्र, (सु० र० को०, सदुक्ति) (२) भवत्सौख्यं (सु० र० को०) (३) 'मुपादेयमलभं च्च, मनघं क, ग।

22 (१) कृतद्वैर्व्यालानां ख, ग। (२) कुशालज्जा रज्जु ग्र, ग। (३) निगणः ख, ग।

23 (१) भावः म। (२) कल्हा क।

१९

विवेक रहित हमने कमल के पत्र पर स्थित जल के समान चंचल इन प्राणों के लिए क्या नहीं किया, जो धन के कण के प्रति ही विद्यमान मोहरूपी अंधकार से ग्रस्त धनिकों के आगे निर्लज्ज होकर निज गुण कथन के महापाप को भी किया है।

२०

सज्जनों के लिए अकारण ही यह दैवी यातना कहाँ से आ गई है कि उन्हें विषय भोग बीभत्स अर्थात् (घृणायुक्त) लगते हैं फिर भी उनकी कामनाएँ चिरजीवी बनी रहती है; देह की क्षीणता मृत्यु की ओर बढ़ रही है, फिर भी गृह (घर तथा पत्नी) के प्रति आग्रह बढ़ता जा रहा है; ब्रह्म की उपासना करनी चाहिए, यह हृदय में उठता है, फिर भी वासनाएँ उन्हें रोक देती हैं।

२१

विद्युत की माला की तरह चंचल आसक्तिरूपी अन्धकार के प्रति वैराग्य धारण करना चाहिए। संसार में सुखानुभूति को छोड़कर शान्ति आदि सुखों को प्राप्त करना चाहिए। इन व्यक्त भावनाओं को चंचल वाणी तथा शून्य मनवाले हम लज्जारहित होकर शुक की तरह प्रतिदिन पढ़ते हैं।

२२

जब चित्तरूपी हाथी का दुर्वार मद बहने लगता है, तब उसके उद्दण्ड प्रसारपूर्ण क्रियाओं के द्वारा धैर्यरूपी स्तम्भ निजकुल-आचाररूपी बेड़ी, लज्जा रूपी रज्जु तथा विनयरूपी कठोर अंकुश भी निरर्थक हो जाते हैं।

२३

भिक्षा भोजन है, निवास के लिए देवालय का एक कोना घर बना हुआ है, शैय्या के लिए भूमि है ही तथा परिजन के नाम पर अपनी देह का भार तथा वस्त्र के रूप में पुराने वस्त्र खण्डों से जोड़कर बनाई गई कथरी है, फिर भी चित्त विषयों को नहीं छोड़ता।

24 त्वामुदर साधु मन्ये शाकैरपि यदसि लब्धपरितोषम्[1] ।
हतहृदयं ह्यधिकाधिकवाञ्छाशतदुर्भरं न पुनः ॥२४॥

25 निःस्वो वष्टि शतं शती पुनरहो[1] लक्षं सहस्राधिपो[2]
लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेश्वरत्वं पुनः ।
चक्रेशः पुनरिन्द्रतां, सुरपतिर्ब्राह्मं पदं वाञ्छति
ब्रह्मा विष्णुपदं हरिः शिवपदं[3] मा(स्वा)शावधिं को गतः[4] ॥२५॥

26 शुचां[1] पात्रं धात्री परिणतिरमेध्यप्रचयभू-
रयं भूतावासो विमृश कियतीं[2] याति न दशाम् ।
तदस्मिन्धीराणां क्षणमपि किल[3] स्थातुमुचितं
खलीकारः कोऽयं यदहमहमेवेति रभसः ॥२६॥

27 रेतःशोणितयोरियं परिणतिर्यद्वर्ष्म तच्चाभव-[1]
न्मृत्योरास्पदमाश्रयो[2] गुरुशुचां रोगस्य विश्रामभूः ।
जानन्नप्यवशी[3] विवेकविरहान्मज्जन्नविद्याम्बुधौ[4]
शृंगारीयति पुत्रकाम्यति वत[5] क्षेत्रीयति स्त्रीयति ॥२७॥

---

24 (१) परितोषः ग ।

25 (१) क, ख, ग, घ मातृकासु नास्ति, (२) सदा वाञ्छति (सु० र० को०) (३) पुनः पुनरहो क, ग, घ, च, (४) म मातृकायां पद्यमिदं नास्ति ।

26 (१) शुची ग, (२) कियता घ, (३) किमास्था म ।

27 (१) तत्राभवन् सु० र० भा०, (२) मृत्योरामिषमास्पदं सु० र० को०, मृत्योराश्रयास्पदम् ग, (३) जानन्नप्यवशो सदुक्ति, (४) बुधि ग, (५) रत ग, च, तव म ।

२४

हे उदर मैं तुम्हें प्रशंसा योग्य मानता हूँ, जो तुम शाक से भी सन्तुष्ट हो जाते हो, किन्तु अधिक से अधिक सैंकड़ों मनोरथों से भी पूर्ण न होने वाले इस अभागे हृदय को मैं अच्छा नहीं मानता हूँ।

२५

निर्धन व्यक्ति सौ मुद्राएँ चाहता है; जिसके पास सौ मुद्राएं हैं, वह लाख चाहता है; लक्षपति भूमि का स्वामी होना चाहता है और राजा चक्रवर्ती होना चाहता है। चक्रवर्ती राजा भी इन्द्र पद पाना चाहता है तथा इन्द्र ब्रह्म पद की कामना करते हैं; ब्रह्मा विष्णुपद को तथा विष्णु शिवपद को चाहते हैं। इस प्रकार निश्चय ही किसी की आशा पूर्ण नहीं होती।

२६

यह भूमि ही शोक के योग्य है, क्योंकि यह बहुविध अमेध्य पदार्थों का आश्रय है। यह पंच भूतों का आवास शरीर कितनी दुर्दशा को नहीं प्राप्त करता है? यह भी सोचो। तो इस शरीर में धीर पुरुषों का क्या क्षण भर भी रहना उचित है, अर्थात् नहीं। फिर भी यह मैं हूँ, मैं हूँ, इस प्रकार का आवेग कौन सा है, जो सबों को खल (नीच) बना रहा है।

२७

एक तो यह शरीर ही शुक्र तथा शोणित का परिणाम है, उस पर भी वह मृत्यु का आस्पद है, इतना ही नहीं, बड़े-बड़े शोक रोग का भी वह आश्रय है। खेद यह है कि इसे जानते हुए भी अजितेन्द्रिय पुरुष विवेक न होने के कारण अविद्या के सागर में डूबते हुए भोग की कामना करते हैं, पुत्रों की कामना करते हैं तथा क्षेत्र और स्त्री की कामना करते हैं।

28 क्वैतद् वक्त्रारविन्दं क्व तदधरमधु क्वायतास्ते कटाक्षाः
क्वालापाः कोमलास्ते क्व[1] च मदनधनुर्भङ्गुरो भ्रूविलासः ।
इत्थं[2] खट्वाङ्गकोटौ प्रकटितदशनं मञ्जुगुञ्जत् समीरं
रागान्धानामिवोच्चैरुपहसति महामोहजाले[3] कपालम् ॥२८॥

29 शृणु हृदय रहस्यं यत्प्रशस्तं मुनीनां
न खलु न खलु योषित्संगमः[1] संविधेयः ।
हरति[2] हि हरिणाक्षी क्षिप्रमक्षिक्षुरप्रैः
पिहित[3]शमतनुत्रं चित्तमप्युत्तमानाम् ॥२९॥

30 समाश्लिष्यत्युच्चैर्घनपिशितपिण्डं स्तनधिया
मुखं लालाक्लिन्नं पिबति चषकं सासवमिव[1] ।
अमेध्यक्लेदार्द्रे पथि च रमते स्पर्शरसिको
महामोहान्धानां किमिह[2] रमणीयं न भवति ॥३०॥

इति श्रीमहामहोपाध्यायशिल्हणकृते शान्तिशतके परितापोपशमो
नाम प्रथमः परिच्छेदः ।

---

28 (१) कुशमदन क, ख, ग, घ, च, (२) गण्डं क, (३) जालं म ।
29 (१) सन्निधिः ख, घ, (२) वहति ख, (३) प्रहत क, ख, ग, घ ।
30 (१) सासरमिव क, ख, ग, घ, (२) किमित्र (सु० र० भा०) किमपि म ।

२८

यह मुख कमल कहाँ है ? उसका अधर-मधु कहाँ हैं, ये नेत्र के विशाल कटाक्ष कहाँ हैं ? मधुर आलाप तथा मदन के भंगुर धनुषरूप भ्रू-विलास अब कहाँ हैं ? इस प्रकार चारपाई पर पड़े हुए दाँत निकालते हुए व्यक्ति के पास मधुर गुञ्जार करता हुआ समीर मोह के महाजाल में पड़े हुए रागान्ध व्यक्तियों का मानों उपहास कर रहा है।

२९

हे हृदय, मुनि जनों द्वारा स्वीकृत जो प्रशस्त रहस्य है, उसे सुनो कि स्त्री संग कभी नहीं करना चाहिए, क्योंकि मृग की तरह नेत्रोंवाली स्त्री नेत्ररूपी बाणों से उत्तम जनों के शम रूपी कवच से ढके हुए मन को भी हर लेती है।

३०

मोहान्ध पुरुष अतिशय सघन मांस पिण्ड का स्तन बुद्धि से आलिंगन करता है, लार से भरे हुए मुख का (अधरों का) आसव से परिपूर्ण प्याले की तरह पान करता है, अपवित्र स्राव से गीले योनि मार्ग में स्पर्श सुख का रसिक होकर रमण करता है, क्यों न हो ? महामोह से अन्ध व्यक्तियों के लिए क्या रमणीय नहीं होता।

द्वितीयः परिच्छेदः

31 अयमविचारितचारुतया संसारो भाति रमणीयः।
अत्र पुनः परमार्थदृशा न किमपि सारमणीयः ॥१॥

32 केनाप्यनर्थरुचिना कपटं प्रयुक्त-
मेतत्सुहृत्तनय[1]बन्धुमयं विचित्रम् ।
कस्यात्मजः[2] परिजनः स्वजनो जनो[3] वा
स्वप्नेन्द्रजालसदृशः खलु जीवलोकः ॥२॥

33 आरम्भः संशयानामविनयभवनं पत्तनं साहसानां
दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानाम्[1] ।
दुस्त्याज्यं यन्महद्भिः सुरनरवृषभैः सर्वमायाकरण्डं
स्त्रीरूपं केन लोके विषमयममृतं[2] धर्मनाशाय सृष्टम् ॥३॥

34 यदा प्रकृत्यैव जनस्य रागिणो
भृशं प्रदीप्तो हृदि मन्मथानलः[1] ।
तदात्र भूयः किमनर्थपण्डितैः
कुकाव्यहव्याहुतयो[2] निवेशिताः[3] ॥४॥

35 ददति[1] तावदमी विषयाः सुखं
स्फुरति यावदियं[2] हृदि मूढता[3] ।
मनसि तत्त्वविदां तु[4] विवेचके
क्व विषयाः क्व सुखं क्व परिग्रहः ॥५॥

---

32 (१) सुहृत्तुल्य ख, (२) कस्या एकः ख, घ, च, छ, कस्यात्र म, (३) किल सुहृत् सुजनो जनो घ ।

33 (१) प्रमेयानां ख, सक्र प्रत्याशं घ, (२) विषममृतमयं म ।

34 (१) मन्मथाननः ख, घ, (२) हव्याभूतयो घ, हव्याकृतयो च, छ, (३) नियोजिता घ ।

35 (१) दत्रति म, (२) तावदियं (मु० र० को०) ग, (३) वासना (सदुक्ति), (४) विदां च, क, ख, (सदुक्ति) ।

३१

भली प्रकार विचार न करने पर चारुता के कारण यह संसार रमणीय प्रतीत होता है, किन्तु परमार्थतः विचार करने पर इसमें किञ्चित् मात्र भी सार नहीं है।

३२

किसी अनर्थ के प्रेमी व्यक्ति ने यह विचित्र कपट किया है कि यह पुत्र है, तथा यह बन्धु-बान्धव है, क्योंकि यह संसार स्वप्न अथवा इन्द्रजाल के समान है, इसमें कौन किसका पुत्र है, परिजन है या स्वजन है ?

३३

समस्त संशयों का आरम्भ, अविनय का भवन, साहसिकता का नगर, दोषों का खजाना, बहुविध कपटमय और अविश्वास की जन्मभूमि, महान् देवों या श्रेष्ठ मानवों द्वारा भी दुस्त्याज्य, सर्वविध माया का पुञ्ज (पिटारा) स्त्रीरूपी विषमय अमृत, धर्म के नाश के लिए किसने बनाया है ?

३४

जब अनायास ही कामी जनों के हृदय में कामानल अतिशय प्रदीप्त होता रहता है, तब अनर्थ करने में कुशल पण्डितों ने उसमें कुकाव्य रूपी हव्य की आहुति क्यों प्रस्तुत कर दी है ?

३५

ये विषय हृदय में तब तक सुख प्रदान करते हैं, जब तक उसमें यह मूढ़ता रहती है। तत्त्वज्ञानी विवेचकों के मन में तो कहाँ विषयों का प्रवेश है ? कहाँ सुख की कामना है तथा कहाँ परिग्रह (पत्नी आदि) ?

36 यदा पूर्वं नासीदुपरि च तथा नैव भविता
तदा मध्यावस्थाक्षणपरिचयो भूतनिचयः।
अतः संयोगेऽस्मिन्वलवति[1]वियोगे च सहजे
किमाधारः प्रेमाः किमधिकरणाः सन्तु च शुचः ॥३६॥

37 इन्द्रस्याशुचिशूकरस्य च सुखे दुःखे च नास्त्यन्तरं
स्वेच्छाकल्पनया तयोः खलु सुधा विष्ठा च काम्याशनम्।
रम्भा चाशुचिशूकरी च परमप्रेमास्पदं मृत्युतः
संत्रासोऽपि समः स्वकर्मगतिभि[1]श्चान्योन्यभावः समः ॥३७॥

38 कृमिकुलचितं लालाक्लिन्नं[1] विगन्धि जुगुप्सितं
निरुपमरसप्रीत्या खादन्नरास्थिनिरामिषम्।
सुरपतिमपि श्वा पार्श्वस्थं सशंकितमीक्षते[2]
नहि गणयति[3] क्षुद्रो लोकः परिग्रहफल्गुताम्[4] ॥३८॥

39 अमीषां जन्तूनां कतिपयनिमेषस्थितिजुषां[1]
वियोगे धीराणां क इह परितापस्य विषयः।
क्षणादुत्पद्यन्ते विलयमपि[2] यान्ति क्षणममी
न केऽपि स्थातारः सुरगिरिपयोधिप्रभृतयः ॥३९॥

---

36 (१) सति ग, परिणति ख, परवति (सु० र० को०)।

37 (१) मतिभि ख, म ।

38 (१) कीर्णं (का० सं०), (२) विलोक्य न शंकते (नीति० ३३) (३) न विगणयति ग, घ, गणयति न हि (सदुक्ति) (४) फलभृतां ग, ख ।

39 (१) युषां क, (२) विलयमथ घ।

३६

जब पहले परिचय नहीं था तथा बाद में भी नहीं रहना है तो मध्य अवस्था में यह क्षणिक परिचय तो भूत संयोग है इसलिए इस स्वाभाविक वियोग के बलवान रहने पर संयोग में प्रेम का क्या आधार है तथा शेष भी किस आधार पर किया जाये।

३७

देवराज इन्द्र तथा अशुचि-शूकर दोनों के सुख तथा दुःख में कोई अन्तर नहीं है। अपनी इच्छा के कारण ही इन दोनों को क्रमशः सुधा, विष्ठा का भोजन प्रिय है, इसी प्रकार उन्हें अप्सरा, रम्भा तथा अशुचि शूकरी परम प्रेम की पात्र प्रतीत होती है। दोनों को ही मृत्यु से भय भी समान रूप से है। इस प्रकार अपनी कर्मगति से भेद होते हुए भी उनमें अन्योन्य भाव समान रूप से ही है।

३८

कुत्ता कीड़ों से भरी हुई, लार से विलन्न, दुर्गन्धयुक्त, घृणित तथा मांस-रहित मनुष्य की हड्डियों को अनुपम रसास्वाद के साथ खाता है तथा पास में स्थित इन्द्र को भी शंका भरी दृष्टि से देखता है। क्षुद्र जन्तु ग्रहण की हुई वस्तु की तुच्छता की परवाह नहीं करता है (अथवा तुच्छता को नहीं समझता है)।

३९

कुछ क्षणों के लिए ही जिनकी स्थिति है ऐसे इन प्राणियों के वियोग से धीर जनों को परिताप नहीं करना चाहिए। ये सभी पदार्थ एक क्षण में उत्पन्न होते हैं तथा क्षण में ही विलीन हो जाते हैं। चाहे सुमेरु हो, चाहे समुद्र, कोई भी स्थिर नहीं रहेंगे।

40 सर्व[1]प्राणविनाशसंशयकरीं प्राप्यापदं दुस्तरां
प्रत्यासन्नतया[2] न वेत्ति विभवं स्वं जीवनं[3] काङ्क्षति
उत्तीर्णस्तु ततो धनार्थमपरां भूयो विशत्यापदं
प्राणानाञ्च धनस्य चाधमधियामन्योन्यहेतुः समः[4] ॥४०॥

41 विमलमतिभिः कैरप्येतज्जगज्जनितं पुरा
विधृ[1]तमपरैर्दत्तञ्चान्यैर्विजित्य यथा तृणम्[2] ।
इह हि भुवनान्यन्ये वीरा[3]श्चतुर्दश भुञ्जते
कतिपयपुरस्वाम्यैः[4] पुंसां क एष मदज्वरः ॥४१॥

42 रम्यं हर्म्यतलं न किं वसतये श्रव्यं[1] न गीतादिकं
किंवा प्राणसमासमागम[2] सुखं नैवाधिकप्रीतये ।
किन्तूद्भ्रान्त[3]पतत्पतंगपवनव्यालोलदीपांकुर-
च्छायाचञ्चलमाकलय्य सकलं सन्तो वनान्तं गताः ॥४२॥

43 आस्तामकण्टकमिदं वसुधाधिपत्यं
त्रैलोक्यराज्यमपि नैव[1] तृणाय मन्ये ।
निःशंकसुप्तहरिणीकुलसंकुलासु
चेतः परं वलति[2] शैलवनस्थलीषु ॥४३॥

---

40 (१) अर्थं ख, (२) प्रत्यासन्नुभयं ख, (३) स्वजीवितं ख, ग, घ, (४) मन्योन्य-भावः पणः ख, च, छ, म ।

41 (१) विभृत क, (२) तृणं यथा म, (३) वीरा क, (४) स्वास्यै क, ख, स्वाम्ये म ।

42 (१) श्राव्यं म, (२) समैः समागम ख, (३) प्रान्त क, ख, ग, म, (सदुक्ति) ।

43 (१) देव ग, तच्च म, (२) वहति ग, विशति क, वलित म ।

४०

समग्र रूप से प्राणों के विनाश का संशय उत्पन्न करनेवाली दुस्तर आपत्ति के निकट आने पर मनुष्य धन की परवाह नहीं करता, अपने जीवन की कामना करता है किन्तु उस विपत्ति को पार करके धन के लिए पुनः दूसरी विपत्ति में फँसता है। अधम बुद्धि वाले लोगों के लिए प्राण तथा धन दोनों ही समान रूप से एक दूसरे के हेतु हैं।

४१

पूर्व समय में कुछ निर्मल बुद्धि वाले लोगों ने इस जगत को (विश्व की शासन व्यवस्था को) उत्पन्न किया, दूसरों ने उसे धारण किया अथवा पालन किया तथा अन्य लोगों ने तृण के समान इस जगत को जीत कर दान कर दिया। दूसरी ओर कुछ लोग चौदहों भुवनों का भोग करते हैं अर्थात् उनके स्वामी हैं इसलिए कुछ थोड़े नगरों का स्वामी होने के नाते मनुष्यों को यह मदज्वर कौन सा है। (अर्थात् इसका मद क्यों होता है ? इस प्रकार स्वामित्व का मद करना उचित नहीं है।)

४२

क्या निवास के लिए सुन्दर महल तल नहीं है ? अर्थात् है। श्रव्य गीतादि नहीं मिलते ? अर्थात् मिलते हैं। तथा प्राण समा (प्रेयसी) के समागम का सुख क्या उन्हें भी अधिक प्रीति नहीं दे सकता था ? अर्थात् दे सकता था किन्तु फिर भी वे (सज्जन लोग) इन सब को भ्रमण करते हुए, गिरते हुए पतिंगे वाली, वायु से चंचल दीपशिखा एवं छाया के समान अस्थिर अर्थात् नश्वर समझ करके उन्हें छोड़कर वन में चले गए।

४३

पृथ्वी का निष्कंटक राज्य तो दूर रहे, त्रैलोक्य के भी साम्राज्य को मैं तृण के तुल्य नहीं समझता हूँ। हमारा चित्त तो केवल निःशंक सोती हुई मृगियों से भरे हुये पर्वतीय वन प्रदेश में ही रमता है।

44 हरिणचरणक्षुण्णोपान्ताः सशाद्वलनिर्झराः
कुसुमललितै[1]र्विष्वग्वातैस्तरंगितपादपाः ।
मुदित[2]विहगश्रेणीचित्रध्वनिप्रतिनादिता
मनसि न मुदं[3] केषां दध्युः शिवा वनभूमयः[4] ॥४४॥

45 ये[1] तीक्ष्णदुर्जननिकार[2]शरैर्न भिन्ना[3]
धीरास्त[4] एव शमसौख्यभुजस्त एव ।
सीमन्तिनीभुजलतागहनं व्युदस्य ।
येऽवस्थिताः शमफलेषु [5]तपोवनेषु ॥४५॥

46 कुरङ्गाः कल्याणं प्रतिविटपमारोग्यमटविं
स्रवन्ति[1] क्षेमं ते पुलिनकुशलं भद्रमुपलाः
निशान्तादस्वन्ता[2]त्कथमपि विनिष्क्रान्त[3]मधुना
मनोऽस्माकं दीर्घामभिलषति युष्मत्परिचितिम् ॥४६॥

47 वासो वल्कलमास्तरः किसलयान्योकस्तरूणां तलं
मूलानि क्षयते[1] क्षुधां गिरिनदीतोयं तृषां शान्तये[2] ।
क्रीडामुग्धमृगैर्वयांसि सुहृदो नक्तं प्रदीपः शशी
स्वाधीने विभवे[3] तथापि कृपणा याचन्त इत्यद्भुतम् ॥४७॥

---

44 (१) कुसुमशरणैः क, घ, शवलै म, (सदुक्ति), (सु० र० को०), (२) विविध क, ख, घ, च, म, (३) मुदः म, (४) वनराजयः छ ।

45 (१) ते म, (२) निशात क, विकार म, (३) शरैरभिन्ना म, (४) धन्यास्त ख, (५) समसुखेषु ख ।

46 (१) श्रयन्ति म, (२) देहस्यात् ग, देहवान्तात् घ, (३) च निष्क्रान्त (सदुक्ति) ।

47 (१) क्षतये म, (२) तृषाशान्तये क, ख, घ, म, (३) स्वाधीनेऽपि धने (सदुक्ति), (सु० र० को०) ।

४४

हिरण के चरणों से जिनका पार्श्व प्रदेश मर्दित है, जहाँ सुन्दर घास तथा झरने हैं। चारों तरफ पुष्पों से मनोरम हवा के झोंकों से तरंगित वृक्ष हैं। जहाँ पर प्रसन्न पक्षियों की मधुर ध्वनि गूँज रही है, वे कल्याणमयी वन भूमियाँ किसके मन में आनन्द नहीं देती हैं।

४५

जिन लोगों ने सुन्दरियों के भुजलता बन्धन को छोड़कर राभ रूपी फलों से युक्त तपोवन में निवास किया है तथा जो दुर्जनों के तीक्ष्ण तिरस्कार रूपी बाणों से घायल नहीं हुए हैं, वे ही धीर हैं तथा वे ही शान्ति रूपी सुख का भोग करनेवाले हैं।

४६

यद्यपि वन में हमारे लिए कुरंग (हरिण) कल्याण को, प्रत्येक वृक्ष आरोग्य को, नदी तट कुशल को एवं पर्वतमालायें भद्र (कुशलता) प्रदान करती हैं, फिर भी हमारा मन निशान्त भूत स्वान्त:करण से निकलकर आपके दीर्घ परिचय की कामना करता है।

४७

जब कि तपोवन में वस्त्रभूत वल्कल, विस्तार के रूप में किसलय, निवास के रूप में वृक्षों की छाया प्राप्त है, क्षुधा की शान्ति के लिए कन्दमूल, तृषा की शान्ति के लिए पर्वतीय नदियों का जल सुलभ है, आमोद के लिए भोले मृग, मित्र के रूप में पक्षी तथा रात्रि में प्रदीप के रूप में चन्द्रमा प्राप्त है इस प्रकार समस्त वैभव अपने आधीन है, फिर भी कुछ दीन (कृपण) याचना करते हैं, यह अद्भुत बात है।

48 शय्या शाद्वलमासने[1] शुचिशिला सद्मद्रुमाणामधः
शीतं निर्झरवारिपानमशनं कन्दः सहाया मृगाः ।
इत्यप्रार्थितलभ्यसर्व[2]विभवे दोषोऽयमेको वने
दुष्प्रापार्थिनि यत्परार्थघटनावन्ध्यैर्वृथा[3] स्थीयते ॥४८॥

49 पूरयित्वार्थिनामाशां प्रियं कृत्वा द्विषामपि ।
पारं गत्वा श्रुतौघस्य धन्या वनमुपासते ॥४९॥

50 आहारः फलमूलमात्मरचिता[1] शय्या मही वल्कलं[2]
संवीताय[3] परिच्छदः कुशसमित्पुष्पाणि पुत्रा मृगाः ।
वस्त्रान्नाश्रय[4]दानभोगविभवा निर्यन्त्रणाः शाखिनो
मित्राणीत्यधिकं गृहेषु गृहिणां किं नाम दुःखावहे ॥५०॥

51 सार्वभौमभवनं वनवासो निःस्वभावभवभावनयाऽसौ[1]
बालिशो हि विषयेन्द्रियचौरैर्मुष्यते[2] स्वभवने च वने च ॥५१॥

52 वनेषु[1] दोषाः प्रभवन्ति रागिणां
गृहेषु पञ्चेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्मणि यः प्रवर्तते
निवृत्तरागस्य गृहं तपोवनम् ॥५२॥

---

48 (१) शाद्वलमासनं म, भूतलमासनं ग, आसनमेको घ, (२) सर्वलभ्य, (३) यत्नैर्विना क ख, ग, घ, म ।

50 (१) रचितं म, रुचिरं घ, रुचितं क, ख ग, च, छ, (२) बन्धनं ग, (३) सन्धीताय क, ग, (४) वस्त्रान्नासन क ।

51 (१) भावनायते क, भावनया ते म, (२) मुंच्यते म ।

52 (१) वने(ऽ)पि क, ख, ग, घ ।

४८

शय्या के रूप में कोमल घास, आसन के रूप में पवित्र शिला, घर के रूप में वृक्षों का तल, पान तथा भोजन के रूप में झरने का शीतल जल तथा कन्दमूल और सहायक मित्रों के रूप में मृग विद्यमान हैं। इस प्रकार बिना प्रार्थना के ही जहाँ सभी वैभव सुलभ हैं ऐसे वन में एक ही दोष है कि याचक सुलभ नहीं है अतः परोपकार के बिना ही निष्फल रहना पड़ता है।

४९

याचकों की आशा को पूरा करके तथा शत्रुओं का भी प्रिय कार्य करके तथा शास्त्रों के समूह के पार जाकर (अर्थात् सभी शास्त्रों का अध्ययन करके) अत्यन्त श्रेष्ठ मनुष्य वन का सेवन करते हैं।

५०

वन में भोजन तो फल फूल तथा स्वयं निर्मित पृथ्वी ही शय्या है। सामग्री के रूप में कुशा, लकड़ी तथा पुष्प रहते हैं, मृग पुत्र के रूप में रहते हैं, वस्त्र, अन्न, आश्रयदान आदि भोग रूप विभववाले बिना बाधा के प्राप्त होने वाले वृक्ष मित्र होते हैं। घर में गृहवासियों को दुःख से अतिरिक्त और क्या प्राप्त होता है।

५१

त्याग भाव से उत्पन्न भावना के द्वारा यह वनवास चक्रवर्ती राजा का भवन है क्योंकि मूर्ख मनुष्य विषयासक्त इन्द्रिय रूपी चोरों के द्वारा अपने घर में तथा वन में (सब जगह) लूटे जाते हैं।

५२

विषयानुरागियों के लिए वन में भी दोष पैदा होते हैं, पञ्च कर्मेन्द्रियों का निग्रह करके घर में निवास करना ही तपस्या है। जो मनुष्य रागहीन होकर सत्कर्मों में प्रवृत्त होते हैं, उनके लिए घर ही तपोवन है।

53 विवेकः किं सोऽपि स्वरसजनिता[1] यत्र न कृपा
स किं योगो[2] यस्मिन्न भवति परानुग्रहरसः ।
स किं धर्मो यत्र स्फुरति न परद्रोह[3] विरतिः
श्रुतं किं तद्वा स्यादु[4]पशमपदं[5] यन्न भवति[6] ॥५३॥

54 अग्रे कस्यचिदस्ति कश्चिदभितः केनापि पृष्ठे कृतः
संसारः शिशुभावयौवनजराभारावतारादयम् ।
बालस्तं बहुमन्यतामसुलभं प्राप्तं युवा सेवतां
वृद्धस्त्वं[1] विषयाद्बहिष्कृत इव व्यावृत्य किं पश्यसि[2] ॥५४॥

55 पुत्रदारादिसंसारः पुंसां संमूढचेतसाम् ।
विदुषां शास्त्रसंसारः[1] सद्योगाभ्यास[2] विघ्नकृत् ॥५५॥

56 स्थूलप्रावरणोऽतिवृत्तकथकः[1] कासाश्रुलालाविलो
भग्नोरःकटिपृष्ठजानुदशनो[2] मुग्धोऽतिथीन्वारयन् ।
शृण्वन्धृष्टवधूवचांसि धनुषा संत्रासयन्वायसान्
आशापाशनिबद्धजीवविहगो[3] वृद्धो गृहे ग्लायति ॥५६॥

इति श्रीमहामहोपाध्यायशिल्हणकृते शान्तिशतके विवेकोदयो
नाम द्वितीयः परिच्छेदः ।

---

53 (१) प्रकृतवलिता क, ग, घ, सुरसजनिका ख, स्वररसजनिता (का॰ सं॰), स्वरसवलिता (सदुक्ति), (सु॰ र॰ को॰), (२) मार्गो (सु॰ र॰ को॰), क, ख, ग, घ, (३) यस्मिन् न भवति परद्रोह घ, (४) श्रुतं तत्किं साक्षादु (सदुक्ति) । ख मातृकायामेतावत् पर्यन्तमेव समुपलभ्यते । (५) फलं (सु॰ र॰ भा॰), (६) नयति (सु॰ र॰ को॰) (सदुक्ति) ।

54 (१) वृद्धस्तद् क, ग, घ, वृद्धस्तं म, (२) पश्यति ग, घ ।

55 (१) सम्भारः ग, च, (२) वियोगाभ्यास क ।

56 (१) कथनः (सु॰ र॰ को॰), पूर्वकथकः म, (२) जघनो (सु॰ र॰ को॰), (३) विभवो क, ग, घ, च, म । अयं श्लोकः ग, घ, च, छ पुस्तकेपु नास्ति ।

५३

वह विवेक क्या विवेक है ? जिसमें स्वाभाविक रूप से उत्पन्न दया न हो, वह योगाभ्यास क्या योगाभ्यास है जिसमें दूसरों के ऊपर अनुग्रह करने का रस (प्रवृत्ति) नहीं है। वह धर्म क्या धर्म है जिसमें दूसरों का द्रोह त्याग करना विकसित नहीं हुआ है। वह अध्ययन क्या है जो शान्ति रूपी फल देने वाला न हो।

५४

शैशव, यौवन तथा वृद्धावस्था के आगमन तथा गमन के कारण यह संसार किसी के आगे है, किसी के चारों ओर है तथा किसी के पीछे छूट गया है। इसलिए वह बालक जिसे संसार अभी सुलभ नहीं है, भले ही इसे बहुत समझे, युवक जिसे संसार अभी प्राप्त हुआ है भलीभाँति उसका सेवन करे किन्तु हे वृद्ध ! तुम तो विषयों द्वारा ही बहिष्कृत कर दिये गये हो, अब क्यों घूम कर देखते हो ?

५५

पुत्र, स्त्री आदि से युक्त यह संसार तो मूर्ख चित्त लोगों के लिए है। विद्वानों का संसार तो शास्त्र ही है क्योंकि यह संसार उत्तम योगाभ्यास आदि करने में विघ्न उत्पन्न करनेवाला होता है।

५६

अनेक आशा के बन्धनों में निबद्ध जीव रूपी पक्षीवाला भोला वृद्ध मोटी रजाई ओढ़े, बीती हुई कथाओं को कहता हुआ, खाँसी, आँसू तथा लार से युक्त, भग्न (झुकी हुई) छाती, कमर, पीठ, घुटना एवं दांतों वाला वह, अतिथियों का निवारण करता हुआ, ढीठ बहुओं के वचनों को सुनता हुआ तथा धनुष से कौओं को डरवाता हुआ घर में दुःखी होता है।

तृतीयः परिच्छेदः

57 महता पूर्वपुण्येन[1] क्रीतेयं[2] कायनौ[3]स्त्वया ।
पारं दुःखोदधे[4]र्गन्तुं तव[5] यावन्नभिद्यते[6] ॥५७॥

58 दिवसरजनीकूलच्छेदैः पतद्भिरनारतं
वहति निकटे कालस्रोतः समस्तभयावहम् ।
इह हि पततां[1] नास्त्यालम्बो न चापि निवर्तनं
तथापि[2] महतां[3] कोऽयं मोहो[4] यदेष मदाविलः[5] ॥५८॥

59 अवश्यं यातारश्चिरतरमुषित्वापि विषया
वियोगे को भेद[1]स्त्यजति न जनो यत्स्वयमिमान्[2] ।
व्रजन्तः स्वातन्त्र्यात्परमपरितापाय मनसः
स्वयं त्यक्ता[3] ह्येते शमसुखमनन्तं विदधति ॥५९॥

60 स्थिरापायः कायः प्रणयिषु सुखं स्थैर्यविमुखं
महाभोगो रोगः[1] कुवलयदृशः[2] सर्पसदृशः ।
गृहावेशः[3] क्लेशः प्रकृतिचपला श्रीरपि खला[4]
यमः[5] स्वैरी[6] वैरी तदपि न हितं कर्म विहितम् ॥६०॥

---

57 (१) पुण्यपथेन क पुण्यपण्येन म, (२) क्रीतोऽयं क, ख, ग, घ, च, (३) काचन क, ख, ग, घ, च, (४) दुःखाम्बुधे च, छ, (५) त्वर म, त्वरया यत्न (का० सं०), (६) जीर्यते च, छ, ग ।

58 (१) पततो (सदुक्ति), (२) तदिह क, ग, घ, म, (३) विदुषां क, (४) दोषो म, (५) मनाविलः क, च, यदेव मनाकुलः (सदुक्ति), ग, च ।

59 (१) भेदः च, (२) स्वयममून् ग, (३) त्यक्त्वा (सु० र० को०), (वै० १७), मुक्ता म ।

60 (१) महारोगाः भोगाः (सु० र० को०), महाभोगा रोगाः म, (का० सं०), (२) समदृशः छ, (३) गृहावेश छ, क, महावेशः म (का० सं०), (४) सदा ग, तथा म. (का० सं०), (५) यशः म, (का० सं०), (६) स्मैरी म, (का० सं०) ।

५७

इस शरीर रूपी नौका को अतिशय पूर्वपुण्य के द्वारा तुमने खरीदा है, जब तक यह नष्ट नहीं होती उससे पूर्व तुम दुःख सागर से पार होने के लिए प्रयत्न करो।

५८

निरन्तर छिन्न होकर गिरते हुए, दिन तथा रात रूपी तटों से युक्त, समस्त भयों से भरा हुआ यह कालरूपी स्रोत निकट ही बह रहा है, यहाँ गिरने वालों का कोई सहारा नहीं है तथा न ही लौटने का कोई उपाय है। इसके प्रति महान लोगों का यह मदभरा मोह कैसा है ?

५९

यह विषय भोग चिरकाल तक साथ रहकर भी स्वयं अवश्य चले जायेंगे इसलिये जो मनुष्य इन विषयों को स्वयं नहीं छोड़ते हैं तो उसमें और इनके स्वयं चले जाने में (इन दोनों प्रकार में) क्या भेद है ? इसलिए मनुष्य इन्हें स्वयं क्यों नहीं छोड़ता ? अपनी इच्छा से जाते हुए ये विषय मन को अपरिमित पीड़ा देते हैं जबकि स्वयं छोड़ने पर अनन्त शान्ति, सुख प्रदान करते हैं।

६०

शरीर विनाशी है, प्रेमीजनों से मिलनेवाला सुख भी स्थिर नहीं है, महान भोग भी रोग के हेतु है तथा मृगनयनियाँ सर्पसदृश हैं, घर का झंझट भी क्लेश रूप है। लक्ष्मी (धन) भी स्वभाव से चपल तथा खल है, स्वच्छन्दचारी यम वैरी है, फिर भी तुमने हित कर्म (पुण्य कर्म) नहीं किया।

61 भवारण्यं भीमं तनुगृहमिदं छिद्रबहुलं
वली कालश्चौरो नियतमसिता मोहरजनी ।
गृहीत्वा ज्ञानासिं विरतिफलकं शीलकवचं
समाधानं कृत्वा स्थिरतर[1]दृशो जाग्रत[2] जनाः ॥६१॥

62 के यूयं भो[1] वयमपि चराः[2] कुत्र यामो[3] भवाब्धौ
कार्ये क्षीणाः[4] विषय[5]चलनैः[6] फेणवत् पुञ्जिताः स्मः ।
तत्क्षेपीयः क्षयिविषयत[7]श्चित्तमादाय[8] पुत्राः
सर्वारम्भैर्विशत[9] जगतामन्तरात्मन्यनन्ते ॥६२॥

63 गृहे पर्यन्तस्थे[1] द्रविणकणमोषं श्रुतिरताः[2]
स्ववेश्मन्यारक्ताः कुरुत[3] लघु मार्गं समुचितम्[4] ।
नरान् देहाद् गेहात् प्रतिनियत[5]माकृष्य नयतः
कृतान्तात् किं शंका न भवति सदा[6] जाग्रत जनाः ॥६३॥

64 सूक्तिं कर्णसुधां व्यनक्तु सुजनस्तस्मिन्[1] न मोदामहे
ब्रूतां वाचमसूयको विषमुचं तस्यां[2] न खिद्यामहे ।
या यस्य प्रकृतिः स तां वितनुतां किं नस्तया चिन्तया[3]
कुर्मस्तत्खलु कर्म जन्मनिगडच्छेदाय[4] यज्जायते ॥६४॥

---

61 (१) तव क, घ, (२) जागृत म ।

62 (१) नो क, ग, घ, म, (२) वयमिति वचः म, वयमिति च वः (का० सं०), (३) क्व भवामो क, ग, घ, के भवामो म, (४) कर्मेऽस्मिन् क्षीणा क, ग, घ, च, कर्मोर्मीणां म, (५) निचय (विपय) ग, च, विषम म, (६) चलनैः च, अयं श्लोकः घ, पुस्तके नास्ति, (७) क्षयिणि विषये म, (८) माधाय म, (९) लगत म ।

63 (१) पर्यङ्कस्थे, (२) श्रुतवताः च, ग, म, (३) रक्षा क्रियत क, ग, च, म, (४) मार्गोऽप्यमुचितः क, ग, घ, च, इति मार्गो म, (५) दिवस म, (६) रे जागृत म ।

64 (१) तस्यां क, च, छ, तस्मै (सदुक्ति), (२) तस्मिन् ग, घ, म, तस्मै (सदुक्ति), (३) जायते म, (४) जन्मनिगणच्छेदाय क, घ, च, छ ।

६१

संसार रूपी महावन अत्यन्त भयानक है, यह शरीर रूपी गृह अनेक छिद्रों से भरा हुआ है। काल रूपी चोर अत्यन्त बलशाली है तथा सघन अंधकारयुक्त मोह रूपी रात्रि (चारों ओर फैली हुई) है। इसलिए हे स्थिरबुद्धिवाले मनुष्य! ज्ञान रूपी तलवार वैराग्य रूपी ढाल लेकर तथा शील रूपी कवच को धारण कर भय का समाधान करके जागते रहो।

६२

आप कौन हैं ? उत्तर—हम भी सेवक हैं, हमलोग कहाँ जायें ? भवसागर में, कर्म रूपी लहरों में हम क्षीण हो गए हैं तथा विषय के चक्र में पड़कर फेन की तरह एकत्र हो गए हैं। ये विषय नाशवान है इसलिए ऐ पुत्रों ! शीघ्र ही चित्त को एकाग्र करके सब के मूल, जगत के अन्तरात्मा अनन्त (भगवान) में प्रवेश करो अर्थात् उनका चिन्तन करो।

६३

पड़ोस के घर में धन कण की चोरी को सुनने में संलग्न हे लोग ! सावधानीपूर्वक अपने घर में कोई शीघ्र समुचित उपाय करो, देह रूपी घर में प्रत्येक को चुन-चुनकर खींचकर मनुष्यों (प्राणों) को ले जाते हुए यमराज से क्या तुम्हें शंका नहीं हो रही है ? हे मनुष्यों ! सदा जागते रहो।

६४

सज्जन व्यक्ति कानों को अमृत की तरह लगनेवाली सूक्तियों का उच्चारण करे, उसमें हमें कोई प्रसन्नता नहीं तथा दूसरे से द्वेष करनेवाले विष की वर्षा करने वाले वचन बोलें, उसमें भी हमें कोई खेद नहीं है जो जिसकी प्रकृति है वह उसके अनुसार व्यवहार करे, हमें उससे क्या चिन्ता ? हम तो वही काम करते हैं जो जन्म के बन्धन को काटने के लिए होता है (अर्थात् जिससे सांसारिक बन्धनों से मुक्ति मिल सके)।

65 मन्नि[1]न्दया यदि जनः परितोषमेति
नन्वप्रयत्नसुलभोऽ[2]यमनुग्रहो मे ।
श्रेयार्थिनो हि[3] पुरुषाः परतुष्टिहेतो-
र्दुःखार्जितान्यपि धनानि परित्यजन्ति ॥६५॥

66 कश्चित्पुमान् क्षिपति मामतिरूक्षशब्दैः[1]
सोऽहं क्षमाभवनमेत्य शमं[2] प्रयामि ।
शोकं व्रजामि पुनरेवमयं तपस्वी
चारित्रतः स्खलितवानिति मन्निमित्तम् ॥६६॥

67 स्वकर्म[1]पीडामपि चिन्तयन्यो[2] मत्पापशुद्धार्थं[3]मिह प्रवृत्तः ।
न चेत्क्षमामप्यहमस्य कुर्यां भवेत्[4] कृतघ्नो वद कीदृशोऽन्यः ॥६७॥

68 नन्वा[1]त्मन्यवधीयतां गृहसुखाद्[2] वैराग्यमाधीयतां
रोद्धव्यान्[3] व्यवधीयतां[4] सुरसरित्तीरे सदा स्थीयताम् ।
भिक्षार्थं व्यवसीयतां समुचितं[5] सत्कर्म संचीयताम्
विष्णु[6]श्चेतसि धीयतां[7] परतरं ब्रह्मानुसन्धीयताम् ॥६८॥

69 यत्क्षान्तिः समये श्रुतिः शिव शिवेत्युक्तौ मनोनिर्वृति-
र्भैक्षे चाभिरुचिर्गृहेषु[1] विरतिः[2] शश्वत्समाधौ रतिः ।
एकान्ते वसतिर्गुरून्[3] प्रति नतिः[4] सद्भिः समं संगतिः
सत्ये[5] प्रीतिरनङ्गनिर्जितिरसौ सन्मुक्तिमार्गे स्थितिः ॥६९॥

---

65 (१) मे म, (२) जनितो (सु० र० को०), (३) श्रेयार्थिनोऽपि च, (सु० र० भा०) ।

66 (१) वाक्यैः ग, च, छ, प्रति रुक्षवाक्यैः म, (का० सं०) (२) मुदं क, घ, च, म ।

67 (१) धर्म क, म, (२) पीडामपहाय योऽयं म, (३) शुद्ध्यर्थं म, (४) मत्तः म ।

68 (१) आत्मा म, (२) गृहवशाद् म, (३) बन्धुभ्यो म, (४) सीयतां च, छ, (५) प्रतिदिनं म, (६) कृष्ण ग, कोप म, (७) हीयतां म ।

69 (१) धनेषु म, (२) वनेषु वसति ग, कुलेषु विरतिः च, (३) गुरौ म (४) गुरौ प्रणमतिः क, (५) सत्सु घ, सत्त्वे क, म ।

६५

यदि किसी को मेरी निन्दा से प्रसन्नता होती है तो यह बिना प्रयत्न के ही (उपासक बनाने में) मुझ पर कृपा ही है, कल्याण की कामना करने वाले पुरुष तो दूसरे की तुष्टि के लिए अत्यन्त दुःख से अर्जित धनों का भी त्याग करते हैं ।

६६

कोई मनुष्य मेरा अत्यन्त रुक्ष शब्दों से अधिक्षेप करता है (गाली देता है) किन्तु मैं क्षमा भवन में पहुँचकर शान्ति पा जाता हूँ किन्तु बाद में मुझे इसका यह शोक होता है कि यह तपस्वी (बेचारा) मेरे कारण चरित्र से स्खलित हुआ है ।

६७

अपने कर्म की पीड़ा (त्रुटि) को चिन्तन करता हुआ (समझता हुआ) भी जो व्यक्ति मेरी पापबुद्धि के लिए प्रवृत्त हुआ है यदि मैं उसे क्षमा भी न करूँ तो बताओ मुझसे बढ़कर अन्य दूसरा कौन कृतघ्न होगा ।

६८

निश्चय ही चित्त को तो आत्मा में एकाग्र कीजिए, गृह सुखों से वैराग्य धारण कीजिये, दमन योग्य (मन तथा इन्द्रियों) का दमन कीजिये, गङ्गा के तट पर सदा निवास कीजिये, भिक्षा के लिये प्रयत्न कीजिये, समुचित सत्कर्मों का संचय कीजिए । विष्णु को चित्त में धारण कीजिये, तथा सर्वोत्कृष्ट परब्रह्म का अनुसन्धान कीजिए ।

६९

जो कि सहनशीलता, समय पर शास्त्र श्रवण, शिव-शिव कथन में मन को तृप्ति, भिक्षा से प्रेम, घर, स्त्री, पुत्रादि सुख-साधनों से वैराग्य, निरन्तर समाधि में अनुराग, एकान्त में निवास, गुरु के प्रति श्रवण भाव, सज्जनों के साथ संगति, सत्य के प्रति प्रेम तथा काम पर विजय है, यही सन्मुक्ति के मार्ग में स्थिति है ।

70 संभोगाद्विषयामिषस्य परितस्तैमित्यमस्ताखिल-
ज्ञानोन्मेषतया कथं तव भवेदात्मास्पदं देहिनः ।
साध्यं तद्धि तदेव साधनमितो[1] व्यावृत्तिरेवामिषात्
तस्यां[2] ज्योतिरुपैत्यनिन्धनमिदं दोषत्रयं धक्ष्यति ॥७०॥

71 बुद्धेरगोचरतया न गिरां प्रचारो,
दूरे गुरुप्रथितवस्तुकथावतारः[1] ।
तत्त्वं क्रमेण करुणादिगुणावदाते[2]
श्रद्धावतां हृदि पदं स्वयमादधाति ॥७१॥

72 दुःखाङ्गारकतप्तः[1] संसारोऽयं महानसो गहनः ।
इह विषयामिषलालस मानसमार्जार मा निपत[2] ॥७२॥

73 अरे चेतो मत्तः[1] भ्रमणमधुना यौवनजले
त्यज त्वं स्वच्छन्दं युवतिजलधौ पश्यसि न किम् ।
तनूजालीजालं स्तनयुगलतुम्बीफलयुतं
मनोभूः कैवर्त्तः क्षिपति रतितन्त्रं[2] प्रति मुहुः[3] ॥७३॥

74 तरुणिमसमारम्भे तस्याः शरीरसरोवरं
सरभस मनोहंस श्रीमत्प्रयासि कथं पुनः[1] ।
श्रवणलतिकापाशौ पार्श्वे प्रसारितपातितौ[2]
हतविधिवशाद्बन्धायान्धो न पश्यति किं भवान्[3] ॥७४॥

---

70 (१) मितां म, (२) तस्मात् ग, घ, म ।

71 (१) कथाविचारः ग, (२) विदुषां करुणावदाते म ।

72 (१) तीव्रः—क, ख, ग, घ, च, छ, म, (२) किं पतसि छ ।

73 (१) मतस्य क, ग, घ, च, मीन म, (२) परितस्त्वां म, (३) प्रतिमुग्धः ग ।

74 (१) मम क, (२) पातितैः क, ग, (३) श्लोकोऽयं म इति मातृकायां नोपलभ्यते ।

७०

विषय रूपी आमिष के संभोग से चारों ओर समस्त ज्ञानोदय के अस्त हो जाने से तुम प्राणियों का अतिशय कल्याण कैसे प्राप्त हो सकता है, यदि अतिशय कल्याण ही तुम्हारा साध्य है तो इस विषय रूपी आमिष से व्यावृत्ति ही उसका साधन है तथा उससे (उस निवृत्ति में) वड़वानल की ज्योति उत्पन्न होती है। यह ज्योति तीनों दोषों को नष्ट कर देगी।

७१

(वह परम तत्व ब्रह्म) बुद्धि से अगोचर है, अतः उसमें वाणी का प्रवेश नहीं हो सकता, गुरु द्वारा प्रवर्तित तद्विषयक कथा का अवतार भी सुलभ नहीं है, ऐसी स्थिति में करुणा से निर्मल श्रद्धा युक्त विद्वानों के हृदय में यह तत्त्व स्वयं ही स्थान बना लेता है।

७२

यह संसार रूपी भयंकर महानस (रसोई घर) दुःख रूपी अंगार से अत्यन्त तप्त है, इसलिए हे मनरूपी मार्जार ! विषय रूपी आमिष की लालसा से यहाँ मत गिरो।

७३

हे मतवाले चित्त ! यौवन रूपी जल से युक्त, युवती रूपी जलधि (समुद्र) में अब तुम स्वच्छन्द विहार छोड़ दो। क्या तुम देखते नहीं हो कि कामदेव रूपी धीवर स्तनयुगल रूपी तुम्बीफल से युक्त रोम राज्य रूपी जाल को रति रूपी तन्त्र पूर्वक बारंबार फेंक रहा है।

७४

हे मन रूपी हंस ! तरुणिमा के आरम्भ में ही तुम उस सुन्दरी के शरीर रूपी सरोवर में सवेग क्यों जा रहे हो ? उसकी श्रवण लतिका के पार्श्व में फैलाकर गिराए हुए दो पाशों को क्या दुर्भाग्यवश अन्धे हो जाने के कारण तुम उसे नहीं देख रहे हो ?

75 विषयविषधराणां दोषदंष्ट्राकटानाम्[1]
विषमविषयसंग[2]व्यक्तदुश्चेष्टितानाम् ।
विरम विरम चेतः सन्निधानादमीषाम्
सुखकणमणिहेतोः संगमं[3] मा स्म कार्षीः ॥७५॥

76 एकीभूय स्फुटमिव किमप्याचरद्भिः प्रलीनै-
रेभिर्धूर्तैः[1] स्मर कति[2] कृताः स्वान्त ! ते विप्रलम्भाः ।
तस्मादेषां त्यज परिचयं चिन्तय स्वव्यवस्थाम्
आभाणस्ते[3] किमु न विदितः खण्डितः पण्डितः स्यात् ॥७६॥

77 धूर्तैरिन्द्रियनामभिः प्रणयितामापादयद्भिः स्वयं
सम्भोक्तुं विषयामिषं[1] किल पुमान् सौख्याशयावञ्चितः ।
तैः सर्वैः[2] कृतकृत्यतामुपगतैर्बद्धा[3]स्यमालम्बितं
संप्रत्येष विधेर्नियोगवशगः कर्मान्तरैर्बध्यते ॥७७॥

78 दैवे समर्प्य चिरसंचितकर्मजालं[1]
सुस्थाः[2] सुखं वसत किं परयाचनाभिः ।
मेरुं प्रदक्षिणयतोऽपि दिवाकरस्य
ते तस्य सप्त तुरगा न कदाचिदष्टौ ॥७८॥

79 आकाशमुत्पततु गच्छतु वा दिगन्त-
मम्भोनिधिं विशतु तिष्ठतु वा यथेच्छम् ।
जन्मान्तरार्जितशुभाशुभकृन्नराणां
छायेव न त्यजति कर्मफलानुबन्धः[1] ॥७९॥

---

75 (१) ट्रोत्कराणाम् म, (२) विषयविषविमर्द म, (३) नाहो साहसं म ।
76 (१) भूतै म, (२) कृति म, (३) आभाषस्ते म ।
77 (१) नयं म, (२) शेषैः क, ग, घ, च, (सु० र० को०), शेषे म, (३) रौदा म ।
78 (१) मोहजालं क, घ, च, म, मोहभारं (सु० र० को०), (२) स्वस्थाः (सु० र० को०) ।
79 (१) बन्धि च, ग ।

७५

हे चित्त ! दोष रूपी दांतों से प्रहार करनेवाले विषम विषयों के संपर्क के द्वारा जिनकी दुश्चेष्टाएँ व्यक्त हैं, उन विषय रूपी विषधरों (सर्पों) की निकटता से बचो। सुख-कण रूपी मणि के लिए तुम इनकी संगति मत करो।

७६

ऐ अन्तःकरण ! मिलकर के तथा छिपकर स्फुट रूप से अपने आचरण करते इन (इन्द्रिय रूपी) धूर्तों के द्वारा तुम कितने बार ठगे गए हो, यह स्मरण तो करो और इस कारण इनकी संगति को छोड़कर अपनी अवस्था पर विचार करो। क्या तुम्हें यह कहानी विदित नहीं है जिसमें धूर्तों ने मिलकर पण्डित को ठग लिया।

७७

स्वयं प्रेम भाव प्रकट करते हुए इन्द्रिय रूपी धूर्तों ने विषय रूपी मांस का भक्षण करने के लिए सुख की आशा से पुरुष (जीव) को धोखा दिया। कालान्तर में वे सभी स्वयं कृतकृत्य होकर मौन हो गए और अब यह भाग्य के फेर में पड़ा हुआ दूसरे कर्मों के द्वारा बाँधा जा रहा है।

७८

चिर संचित कर्मजाल को दैव के प्रति अर्पित करके सुस्थिर होकर सुखपूर्वक निवास करो, दूसरों की याचना से क्या लाभ ? क्योंकि नित्य मेरु की प्रदक्षिणा करने पर भी सूर्य के सात घोड़े कभी आठ नहीं हुए।

७९

(मनुष्य) चाहे आकाश में उड़े, चाहे दिग्दिगन्त में चला जाये, समुद्र में प्रवेश करे अथवा अपनी इच्छा के अनुसार कहीं रहे। मनुष्यों का जन्मजन्मान्तर में अर्जित शुभ तथा अशुभ फल देनेवाला कर्मफल का बन्धन छाया की तरह मनुष्यों को नहीं छोड़ता।

80 उपशमफलाद्विद्याबीजात्फलं धनमिच्छतां[1]
भवति विफलो यत्प्रारम्भस्तदत्र[2] किमद्भुतम् ।
नियतविषया ह्येते[3] भावा न यान्ति विपर्ययं[4]
जनयति यतः[5] शालेर्बीजं न जातु यवाङ्कुरम् ।।८०।।

81 यदेते साधूनामुपरि विमुखाः सन्ति[1] धनिनो
न चैषावज्ञैषामपि[2] तु निजवित्तव्ययभयम् ।
अतः खेदो नास्मिन्परममनुकम्पैव भवति
स्वमांसत्रस्तेभ्यः क इह हरिणेभ्यः परिभवः ।।८१।।

82 तस्मादनन्तमजरं परमं विकासि[1]
ब्रह्मैव[2] वाञ्छत बुधा[3] यदि चेतनास्ति ।
यस्यानुसंगत[4] इमे भुवनाधिपत्य-
भोगादयः क्षयिण एव सतां विभान्ति[5] ।।८२।।

इति श्रीमहामहोपाध्यायशिल्हणकृते शान्तिशतके कर्त्तव्योपदेशो नाम तृतीयः परिच्छेदः ।

---

80 (१) फलान्तरमि° म. (२) प्रारम्भो यत्तदत्र (सु० र० को०), (३) सर्वे (सु० र० को०), (४) विक्रियां (सु० र० को०), (५) जनयितुमलं (सु० र० को०) ।

81 (१) मुखरा एव (सदुक्ति), (२) न सावज्ञैरेषामपि (सदुक्ति) ।

82 (१) विकाशि म, (२) तद्ब्रह्म क, ग, घ, च, छ, म, वै० ७८, (३) जना, वै० (४) नुपङ्गत म, (५) भोगादयः कृपणलोकगता भवन्ति घ, वै०, विशन्ति ग ।
इति शान्तिशतके महाकाव्ये (?) कर्त्तव्योपदेश नाम तृतीयः परिच्छेदः ।
पत्र संख्या ८ ख ।

८०

शान्ति रूपी फल देनेवाले वाले विद्या रूपी बीज से फल के रूप में धन की कामना करनेवाले लोगों का प्रयत्न यदि निष्फल हो जाता है तो इसमें क्या आश्चर्य ? क्योंकि इन सभी पदार्थों के विषय नियत हैं, इनमें विपर्यय नहीं होता। कभी धान के बीज में यव (जौ) के अंकुर निकलते हैं ? अर्थात् नहीं।

८१

ये धनी लोग साधुजनों के प्रति जो विमुख हैं इसमें साधुजनों की अवज्ञा कारण नहीं है किन्तु उनके (बनियों के) धन के व्यय का भय ही कारण है। इसलिए इस प्रसङ्ग में खेद नहीं होना चाहिए, अपितु यह अवज्ञा तो उन पर कृपा ही होती है। अपने मांस हेतु मारे जाने के भय से त्रस्त हरिणों के दूर रहने पर क्या उनमें (मनुष्य का) अपमान माना जाता है।

८२

हे बुधजन ! यदि थोड़ा सा भी ज्ञान है तो अनन्त, अजर, सर्वोत्कृष्ट, प्रकाशस्वरूप ब्रह्म की ही कामना करो, जिसके सम्पर्क मात्र से त्रिभुवन का आधिपत्य रूप भोग आदि भी सज्जनों को नष्ट होते हुए के समान प्रतीत होते हैं।

चतुर्थः परिच्छेदः

83 लक्ष्मीर्निर्वृतिमेति हीनचरितैर्यैरेव तच्छिक्षया
किं नाद्यैव करोमि तामनुचरीं रामां सकामामिव ।
ब्रह्माण्डे निपतत्यपि स्खलति न प्रायेण येषां मन-
स्तेषामार्यमनस्विनामनुपदं गन्तास्मि नाहं यदि ॥८३॥

84 लब्धाः श्रियः सकल[1]कामदुघास्ततः किम् ?
संवर्धिताः[2] प्रणयिनो विभवैस्ततः किम् ?
न्यस्तं पदं शिरसि विद्विषतां ततः किम् ?
कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ॥८४॥

85 निष्कन्दाः किमु कन्दरोदरभुवः क्षीणास्तरूणां त्वचः
किं शुष्काः सरितः स्फुरद्गिरिगुरुग्रावस्खलद्वीचयः ।
प्रत्युत्थानमितस्ततः प्रतिदिनं कुर्वद्भिरुद्ग्रीविभि-
र्यद्द्वारार्पितदृष्टिभिः क्षितिभुजां विद्वद्भिरप्यास्यते ॥८५॥

86 कामं जीर्णपलाशसंहतिकृतां कन्थां वसानो वने
कुर्यामम्बुभिरप्ययाचितसुखैः प्राणानुबन्धस्थितिम् ।
साङ्गग्लानि सवेपितं सचकितं सान्त[1]र्निदाघज्वरं
वक्तुं न त्वहमुत्सहे सकृपणं देहीति दीनं[2] वचः ॥८६॥

---

84 (१) सपदि क, (२) संतर्पिताः ग, घ, म ।

86 (१) स्वान्त म, (२) देहीत्यवद्यं (सु० र० को०) ।

८३

जिन लोगों का मन ब्रह्माण्ड के गिर पड़ने पर भी (नष्ट हो जाने पर भी) विचलित नहीं होता है उन आर्य मनस्वी जनों का मैं यदि अनुसरण नहीं कर पाता हूँ तो जिन हीन चरित लोगों के द्वारा लक्ष्मी शान्ति (सुख) को प्राप्त करती है, उनसे शिक्षा लेकर उसे (अर्थात् लक्ष्मी को) कामना युक्त स्त्री की भाँति अपनी अनुचरी क्यों न बना लूँ। तात्पर्य यह है कि यदि हम त्यागी मुनिजनों का अनुसरण नहीं कर पाते हैं तो हमें अपना चरित्र इतना तो उज्ज्वल बनाना ही चाहिए कि लक्ष्मी हमारे पीछे दौड़े।

८४

समस्त कामनाओं को पूर्ण करनेवाली सम्पत्ति यदि मिल गई है तो उससे क्या लाभ? प्रियजनों का धन-वैभव से पालन-पोषण कर लिया है तो उससे भी क्या लाभ? शत्रुजनों के सिर पर चरण रखा अर्थात् उन्हें परास्त कर दिया तो भी क्या हुआ? तथा शरीरधारियों का शरीर आकल्प स्थित रहे, इससे भी क्या लाभ? (अर्थात् मनस्वी के लिए सांसारिक ऐश्वर्य कुछ भी नहीं है)।

८५

क्या कन्दराओं के अन्दर की भूमि कन्दों से रहित हो गई है? क्या वृक्षों के वल्कल नष्ट हो गए हैं? क्या चमकते हुए उन्नत तथा विशाल पर्वत-शिलाओं पर जिनकी लहरें टकराती हैं उन नदियों का जल सूख गया है जो इधर-उधर गर्दन उठाये द्वार पर आँख गड़ाए हुए तथा राजाओं के प्रत्युत्थान आदि सत्कार करते हुए विद्वान लोग बैठे रहते हैं?

८६

भले ही मुझे जीर्ण पत्रों के समूह से बनाई हुई कन्था पर वन में निवास करना पड़े, भले ही याचना के बिना सुखपूर्वक सुलभ जल से ही अपनी प्राण रक्षा करनी पड़े फिर भी अङ्गों की ग्लानि, कम्पन, उत्सुकता तथा अन्तःस्ताप से युक्त होकर कृपण के समक्ष 'मुझे कुछ दो' इस प्रकार गिड़गिड़ाये हुए दीन वचनों को बोलने का साहस नहीं कर सकता हूँ।

87 सत्यं वक्तुमशेषमस्ति सुलभा वाणी मनोहारिणी
दातुं दानवरं शरण्यमभयं स्वच्छं पितृभ्यो जलम् ।
पूजार्थं परमेश्वरस्य विमलः स्वाध्याययज्ञः परम्
क्षुद्व्याधेः फलमूलमस्ति शमनं क्लेशात्मकैः किं धनैः ॥८७॥

88 सन्ति स्वादुफला वनेषु तरवः स्वच्छं पयो निर्झरम्
वासो वल्कलमाश्रयो गिरिगुहा शय्या लतापल्लवाः[1] ।
आलोकाय निशासु चन्द्रकिरणाः सख्यं कुरङ्गैः सह
स्वाधीने विभवेऽप्यहो नरपतिं सेवन्त इत्यद्भुतम्[2] ॥८८॥

89 पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्ष्य[1]मक्षय्यमन्नं
वस्त्रं विस्तीर्णमाशादशकममलिनं[2] तल्पमस्वल्पमुर्वी ।
येषां निःसङ्गताङ्गीकरणपरिणतिः[3] स्वान्त[4]सन्तोषिणस्ते,
धन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्म निर्मूलयन्ति ॥८९॥

90 मही[1]शय्या भूमिर्मलय[2]मुपधानं भुजलता
वितानञ्चाकाशं व्यजन[3]मनुकूलोऽयमनिलः ।
स्फुरच्चन्द्रो दीपो[4] स्वधृति[5]वनितासङ्गमुदितः
सुखं शान्तः शेते न खलु भवभीतो[6]नृप इव ॥९०॥

---

88 (१) वल्लरी (सु० र० भा०), (२) मूढा नराः क, ग, घ ।

89 (१) भैक्ष म, (का० सं०), (२) पमलं क, घ, (सदुक्ति०), (वैं० ५४), (३) चितिः म, चितः (का० सं०), (४) स्वात्म (वैं०) ।

90 (१) सुखा घ, च, छ, (२) निर्म्मल ग, विपुल (वैं०), (३) सन म, (४) स्फुरद्दीपश्चन्द्रः (सदुक्ति०), (५) विरति क, च, छ, (वैं०), सुरभि (सदुक्ति०) (६) ननु च भवभीतो (सदुक्ति०), न खलु रिपुभीतो क, विगत भवभीतिः (सु० र० भा०), (का० सं०), विगत तव भीतिः म ।

८७

जब समग्र सत्य बोलने के लिए मनोहर वाणी सुलभ है, शरणागत को देने के लिए निर्मल जल है, परमेश्वर की पूजा के लिए अत्यन्त निर्मल स्वाध्याय-यज्ञ सुलभ है तथा भूख रूपी रोग की शान्ति के लिए फल-मूल विद्यमान है तब क्लेशात्मक धन से क्या लाभ ?

८८

वनों में (भोजन के लिए) स्वादिष्ट फल वाले वृक्ष हैं, पीने के लिए झरनों का स्वच्छ जल, वल्कल वस्त्र, आश्रम के लिए पर्वतों की गुफाएँ, लता-वल्लरी शय्या है, रात्रि में देखने के लिए प्रकाशरूप चन्द्रकिरणें हैं, मित्रता मृगों के साथ है। अहो ! स्वाधीन विभव के रहते हुए भी मनुष्य राजा का सेवन करते हैं, यह कितना विचित्र (आश्चर्य) है।

८९

जिनके पास हाथ रूपी पवित्र पात्र है, भ्रमण से प्राप्त अक्षय भिक्षा अन्न है, वस्त्र के रूप में विस्तीर्ण दश दिशाएँ हैं तथा विशाल पृथ्वी शय्या है, इस प्रकार निःसंग (अपरिग्रह) के परिणाम स्वरूप जो स्वान्तःकरण में सन्तुष्ट हुए धन्य हैं, वे लोग ही दैन्य तथा उससे प्राप्त दुःखों से मुक्त होकर अपनी कर्म परम्परा को नष्ट करते हैं।

९०

विशाल भूमि जिसकी शय्या है, अपनी भुजलताएँ कोमल उपधान (तकिया) है, आकाश वितान है तथा यह अनुकूल वायु व्यजन है, चन्द्रमा जिनके लिए देदीप्यमान दीपक है (वह व्यक्ति) धैर्य रूपी अपनी वनिता के साथ सानन्द रहनेवाला शान्त पुरुष (विरागी पुरुष) राजा की भाँति सुखपूर्वक सोता है।

91 धैर्यं यस्य पिता क्षमा च जननी शान्तिश्चिरं गेहिनी,
सत्यं सूनुरयं दया च भगिनी भ्राता मनः संयमः ।
शय्या भूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजन-
मेते यस्य[१] कुटुम्बिनो वद सखे कस्माद्भयं योगिनः ॥९१॥

92 धिक् धिक् तान्कृमिनिर्विशेषवपुषः स्फूर्जन्महासिद्धयो
निष्पन्दीकृतशान्तयोऽपि[१] च तपः[२] कारागृहे स्वासिते[३] ।
तं विद्वांस[४]मिह स्तुमः करपुटीभिक्षाल्प[५]शाकेऽपि वा[६]
बालावक्त्र[७]सरोजिनीमधुनि वा यस्याविशेषो रसः[८] ॥९२॥

93 मातर्लक्ष्मि भजस्व किञ्चिद्[१]परं मत्काङ्क्षिणी मा स्म भू-
र्भोगेभ्यः स्पृहयालवस्तव वशाः का निःस्पृहाणामसि[२] ।
सद्यः स्यूत[३]पलाशपत्रपुटिकापात्रे[४] पवित्रीकृतै-[५]
र्भिक्षासक्तुभिरेव संप्रति वयं वृत्तिं समीहामहे ॥९३॥

94 जिह्वे लोचन नासिके श्रवण हे त्वक् चापि नो वार्यसे[१],
सर्वेभ्योऽस्तु[२] नमस्कृताञ्जलिरहं सप्रश्रयं प्रार्थये ।
युष्माकं यदि संमतं तदधुना नात्मानमिच्छाम्यहं-
होतुं[३] भूमिभुजां निकारदहनज्वालाकराले गृहे ॥९४॥

---

91 यस्यैते (का० सं०) ।

92 (१) शान्तिर्येऽपि (सु० र० भा०), (२) तमः क, घ, (३) गृहाच्चासते क, गृहेष्वासते म, (४) त्वं विद्वांसमिह च, घ, (५) भिक्षान्न क, (६) साकेऽपि (वा) क, च, घ, (७) रक्त क, घ, मुग्धावक्त्रमृणालिनी (सु० र० को०), (८) वशः म ।

93 (१) कञ्चिद क, घ, च, (२) का का निःस्पृहानामसि म, मपि क, च, (३) सूत म, (४) पुटिकापात्री (सु० र० को०), (५) कृते म ।

94 (१) स्पर्श नो वार्य्यसे ग, कुत्रापि नो च, (२) सर्वेभ्यस्तु, (३) हेतुं च ।

९१

जिसके पिता धैर्य, माता पृथ्वी चिरशान्ति पत्नी, सत्य, पुत्र, दया भगिनी तथा भाई मन का संयम है। शय्या भूमितल है, दिशा ही वस्त्र है, ज्ञान रूप अमृत ही भोजन है। जिस योगी के ये सब बान्धव हैं, हे मित्र! कहो, उसे किसका भय है ?

९२

महासिद्धि प्राप्त करके भी कीड़ों की तरह जीवन बितानेवाले, कारागृह में रहकर शान्ति को भी निष्पन्द करके जो तप मानते हैं उन्हें धिक्कार है। उस विद्वान् की ही हम सराहना करेंगे जिसका हाथ में लिए भिक्षा पात्र में प्राप्त अल्प शाक तथा सुन्दरी के मुख-कमल-मधु में समान रस (भाव) है।

९३

हे मां लक्ष्मी ! किसी और की सेवा करो। मेरी इच्छा मत करो। हमें भोगों की अभिलाषा नहीं है इसलिए तुम निःस्पृह लोगों की कौन हो ? हम तो इस समय जल से पवित्र किये हुए, तत्काल बनाये हुए, पलाश के पत्तों के दोने रूपी पात्र में भिक्षा से प्राप्त सत्तू से ही जीविका की कामना करते हैं।

९४

हे जिह्वे, लोचन, नाक, कान, त्वचा (इन्द्रियगण) ! यदि तुम नहीं मानते हो (अर्थात् अपने को विषयों से नहीं रोकते हो) तो तुम सब को नमस्कार करता हूँ। मैं हाथ जोड़कर नम्रतापूर्वक तुम लोगों से प्रार्थना करता हूँ। यदि तुम लोगों की यही इच्छा (विचार) है तो भले ही हो किन्तु मैं इस समय निरादर रूपी अग्नि की ज्वाला के कारण भयानक राजाओं के घर में स्वयं को भस्म (होम) नहीं करना चाहता।

95 गतः कालो यत्र प्रणयिनि[1] मयि प्रेमकुटिलः
कटाक्षः कालिन्दीलघुलहरिवृत्तिः प्रभवति ।
इदानीमस्माकं जठर[2]कमठीपृष्ठकठिना
मनोवृत्तिस्तत् किं व्यसनिनि मुधैव[3] क्षपयसि ॥९५॥

96 यदासीदज्ञानं स्मरतिमिरसंस्कार[1]जनितम्
तदा दृष्टं नारीमय[2]मिदमशेषं जगदपि[3] ।
इदानीमस्माकं[4] पटुतरविवेकाञ्जनजुषां
समीभूता[5] दृष्टिस्त्रिभुवनमपि [6]ब्रह्म मनुते ॥९६॥

97 गतः कालो यत्र द्विचरणपशूनां क्षितिभुजां
पुरः स्वस्तीत्युक्त्वा विषयसुखमास्वादितमभूत् ।
इदानीमस्माकं तृणमिव समस्तं कलयता-
मपेक्षा भिक्षायामपि किमपि चेतस्त्रपयति[1] ॥९७॥

98 पूर्वं तावत्कुवलयदृशां लोललोलैरपाङ्गै-
राकर्षाभिः[1] किमपि हृदयं पूजिता यौवनश्रीः ।
संप्रत्यन्तर्निहितसदसद्भावलब्धप्रबोध-
प्रत्याहारापहृतहृदयो[2] वर्तते कोऽपि भावः ॥९८॥

---

95 (१) प्रियसखि (सु० र० को०), (२) जरठ (सदुक्ति), (३) व्यसनि विमुखैव म ।

96 (१) सन्मोह क, (२) वामामवमिदं क, तदाज्ञातं तारामय म, (३) जगदिदं क, (४) त्वस्माकं (सु० र० को०), (५) समीतुल्या क, समीभूत्वा च, ग, (६) त्रिभुवनमिदं क ।

97 (१) क्षपयति ग, च, छ ।

98 (१) राकर्षद्भिः (सदुक्ति), (का० सं०), (२) प्रत्याहारैर्विशदहृदये म ।

९५

वह समय बीत गया जब मुझ प्रेमी को कुटिल कटाक्ष व्यथित करते थे। अब ज्ञानरूपी यमुना की लघु लहरियों का वेग अपना प्रभाव डाल रहा है। इस समय तो हमारी मनोवृत्ति वृद्ध कच्छपी की पीठ की तरह कठिन (कठोर) हो गई है, इसलिये हे व्यसनिनि ! तू व्यर्थ ही मुझ पर प्रहार कर रही है।

९६

हमें जब कामदेव रूपी तिमिर (नेत्र रोग) के संस्कार से उत्पन्न अज्ञान था उस समय यह समस्त संसार नारीमय दिखाई पड़ रहा था किन्तु अब उत्कृष्टतर विवेकरूपी अन्जन से युक्त होने के कारण हमारा दृष्टिकोण समीभूत है (अर्थात् मैं समदृष्टि हो गया हूँ) इसलिए हमें त्रिभुवन ब्रह्ममय दिखाई पड़ रहा है।

९७

वह समय बीत गया जब दो चरण वाले पशुओं अर्थात् राजाओं के समक्ष 'तुम्हारा कल्याण हो' ऐसा कहकर (अर्थात् आशीर्वाद देते हुए) विषय सुखों का हमने आस्वादन किया, इस समय तो हमारे लिए समस्त सुख तृण की भाँति प्रतीत हो रहे हैं। भिक्षा के प्रति भी उपेक्षा हो रही है क्योंकि वह भी मन को कुछ लज्जित कर रही है।

९८

पहले कमलनयनियों के अतिशय चंचल नेत्र-कटाक्षों के द्वारा हृदय का: आकर्षण होने से यौवन की शोभा की भले ही पूजा हो गई किन्तु इस समय तो हृदय में विद्यमान सदसद्-विवेक से ज्ञान का उदय होने से निर्मल हृदय में कोई विशेष भाव आ गया है (अर्थात् अब यौवन के प्रति आकर्षण समाप्त हो गया)। अब हमारा हृदय सदैव ईश्वर का चिन्तन कर रहा है।

99 दिशो वासः पात्रं करकुहरमेणाः प्रणयिनः
समाधानं निद्रा शयनमवनी मूलमशनम् ।
कदैतत्सम्पूर्णं मम हृदयवृत्तेरभिमतं
भविष्यत्येवायुः[१] परमपरितोषोपचितये ॥९९॥

100 कदा भिक्षाभक्तैः[१] करगलित[२]गंगाम्बुतरलैः
शरीरं मे स्थास्यत्युपरतसमस्तेन्द्रियसुखम् ।
कदा ब्रह्माभ्यासस्थिरतनुतयारण्यविहगाः
पतिष्यन्ति स्थाणुभ्रमहतधियः स्कन्धशिरसि ॥१००॥

101 गंगातीरे हिमगिरिशिलाबद्धपद्मासनस्य
ब्रह्मध्याना[१]भ्यसनविधिना योगनिद्रां गतस्य[२] ।
किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशंकाः
संप्राप्स्यन्ते[३] जरठ[४]हरिणाः गात्रकण्डूविनोदम् ॥१०१॥

102 वन्या[१]न्तश्चरतस्तथा धृतजरत्कन्थापटस्या[२]शुगैः[३]
सत्रासञ्च सकौतुकं सचकितं[४] दृष्टस्य तैर्नागरैः ।
निर्बीजी[५]कृतचित्सुधारसमुदानिद्रायमाणस्य मे
निःशङ्कं करटः कदा करपुटीभिक्षां विमुञ्चिष्यति[६] ॥१०२॥

---

99 (१) भविष्यत्यत्युग्रं (सु० र० को०) ।

100 (१) भक्ष्यः (सदुक्ति), (२) कलित ग, घ, म ।

101 (१) ज्ञाना म, (२) निद्रासनस्य क, (३) संज्ञास्यन्ते म, (४) जठर (का० सं०) ।

102 (१) रथ्या म, रत्या च, घ, (२) कन्थाञ्चलस्या घ, ग, (का० सं०), (३) अध्वगैः क, ग, (का० सं०), (४) सकौतुकञ्च सकृपं म, (५) निर्व्याजी च, (६) विलुण्ठिष्यति म ।

९९

वस्त्र के रूप में दिशायें, पात्र के रूप में अञ्जलि, प्रेमी सहचरों के रूप में मृग, समाधान के रूप में निद्रा, बिस्तर के रूप में पृथ्वी तथा भोजन के रूप में कन्दमूल, यह सब जब हमारी चित्तवृत्ति को अभिमत होंगे तब यह हमें परम परितोष प्रदान करेगा (अथवा हमारे परम परितोष को बढ़ाने के लिए होगा)।

१००

कब मेरा शरीर समस्त इन्द्रिय सुखों को त्यागकर भिक्षा प्राप्त भात तथा हाथ में उठाये हुए गंगाजल पर निर्भर होगा तथा कब ब्रह्मचिन्तन में शरीर के स्थिर हो जाने पर स्थाणु के भ्रम से, हतबुद्धि वन्य पक्षी हमारे कन्धों तथा सिर पर आ गिरेंगे अर्थात् बैठेंगे।

१०१

गंगा के तट पर हिमालय की शिला पर पद्मासन लगाकर ब्रह्मचिन्तन में लीन, योग निद्रा में स्थित कब मेरे लिए वे शुभ दिन होंगे जब वृद्ध हरिण मेरे स्थिर शरीर से निःशंक होकर अपने शरीर की खुजली मिटाकर मनोरंजन प्राप्त करेंगे ?

१०२

वन्य प्रदेश के अन्दर विचरण करते हुए पुरानी कन्था रूप वस्त्र को धारण किये हुए, अतएव शीघ्र गमन करते हुए नागरों द्वारा भय, कौतुक तथा आश्चर्यपूर्वक देखे जाते हुए कर्मफलों को समाप्त करके, परमचैतन्य परब्रह्मरूपी अमृत रस के आस्वादन के हर्ष के कारण निद्रायमान (बाह्य ज्ञान से शून्य) मेरे हाथों में विद्यमान भिक्षा को कब कौआ निःशंक होकर छीनेगा (ग्रहण करेगा) ?

103 पद्माक्षीस्पृहयाद्भुता[1] न कथमप्यास्ते विवेकोदयः[2]
नित्यप्रच्युति[3]शङ्कया क्षणमपि स्वर्गे न मोदामहे ।
अल्पा[4]न्येषु विलासि[5]वस्तुविषयाभोगेषु तृष्णा[6] न मे,
स्वर्नद्याः[7] पुलिने परं हरिपदं ध्यातुं[8] मनो वाञ्छति ॥१०३॥

104 मातर्माये भगिनि कुमते हे पितर्मोहजाल
व्यावर्त्तध्वं भवतु भवतामेष दीर्घो वियोगः ।
सद्यो लक्ष्मीरमणचरणभ्रष्टगङ्गाप्रवाह-
व्यामिश्रायां दृषदि परमब्रह्मदृष्टिर्भवामि ॥१०४॥

105 मातर्मेदिनि तात मारुत सखे ज्योतिः सुबन्धो जल
भ्रातर्व्योम निबद्ध एव[1] भवतामन्त्यः[2] प्रणामाञ्जलिः ।
युष्मत्संगवशोपजातसुकृतो[3]द्रेकः स्फुरन्निर्मल-
ज्ञानापास्तसमस्तमोह[4]महिमा लीये परे ब्रह्मणि ॥१०५॥

106 आशा नाम नदी मनोरथजला तृष्णातरंगाकुला
रागग्राहमयी[1] वितर्कविहगाः धैर्यद्रुमध्वंसिनी ।
मोहावर्तसुदुस्तरातिगहना [2]प्रोत्तुंगचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥१०६॥

इति श्रीशान्तिशतके ब्रह्मप्राप्तिर्नाम चतुर्थः परिच्छेदः ।

इति श्री महामहोपाध्यायश्रीशिल्हणकृतं शान्तिशतकंसमाप्तम् ।
शकाब्दाः १७२४ श्रीईश्वरचन्द्रदेवशर्मणः पुस्तकमिदं स्वाक्षरञ्च ।

---

103 (१) यात्युता घ, यालुता म, (२) विवेकोदयात् क, म, (३) त्यति क, घ, च, (४) अप्यन्येषु म, (५) विनाशि म, (६) स्वर्गो क, ग, (७) स्वर्णद्याः म, (का० सं०), (८) हरिपदध्यानं म ।
105 (१) एष म, (२) भवतामस्तु म, (३) सुहृतो क, (४) दोष क ।
106 (१) रागद्वेषमयी क, रागग्राहवती ग, म, (२) प्रकटित म ।

१०३

अब विवेक का उदय हो जाने के कारण स्पृहापूर्वक मृगनयनी (हमें) किसी भी प्रकार अद्भुत नहीं दिखाई देती है। प्रतिदिन अतिशय शंका के कारण स्वर्ग के विषय में भी हमें क्षण भर के लिए भी आनन्द नहीं मिलता है। अन्य विलास की वस्तुओं के भोग में भी हमारी किंचित् मात्र भी स्पृहा नहीं है। हमारा मन तो केवल स्वर्ग गंगा के तट पर विष्णु पद का ध्यान करना चाहता है।

१०४

हे माँ माया, बहन दुर्बुद्धि, पिता मोहजाल! आप सब लौट जायें तथा हमारा आपसे यह वियोग सुदीर्घ हो अर्थात् सार्वकालिक हो जाये। मैं अतिशीघ्र भगवान विष्णु के चरणों से प्रसूत गंगा प्रवाह से युक्त शिला पर परब्रह्म का साक्षात्कार करने वाला हो रहा हूँ।

१०५

हे माँ पृथ्वी, पिता, वायुदेव, मित्र अग्निदेव, सुबन्धु, जलदेव तथा भाई आकाश! यह मेरी आप सब के लिए अन्तिम प्रणामाञ्जलि है, आपकी संगति वश उत्पन्न पुण्य के उद्रेक वाला, स्फुरित होने वाले ज्ञान से दूर हुए समस्त मोह के प्रभाव वाला, मैं परब्रह्म में लीन हो रहा हूँ।

१०६

मनोरथ रूपी जलवाली, तृष्णारूपी तरंगों से युक्त, रागरूपी मगरवाली, वितर्क रूपी पक्षी वाली, धैर्य रूपी वृक्ष का विनाश करने वाली, मोह रूपी आवर्त के कारण दुस्तर तथा गम्भीर चिन्ता रूपी ऊँचे तटों वाली, आशा नामक महानदी है। विशुद्धमन वाले योगीश्वर लोग उसके पार पहुँचने पर आनन्द का अनुभव करते हैं।

शान्तिशतकस्य कतिपयमातृकासूपलभ्यमानाः अधिकाः श्लोकाः

(१) अलमतिचपलत्वात्स्वप्नमायोपमत्वात्
परिणतिविरसत्वात् सङ्गमेनाङ्गनायाः।
इति यदि शतकृत्वस्तत्त्वमालोचयामः
तदपि न हरिणाक्षीं विस्मरत्यन्तरात्मा ॥

(ख. ग. घ. च)

(२) आदित्यस्य गतागतैरहरहः संक्षीयते जीवनम्
व्यापारैर्बहुकार्यभारगुरुभिः कालोऽपि न ज्ञायते।
दृष्ट्वा जन्मजरावियोगमरणं त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत्।

(घ)

(३) संसारमृगतृष्णासु मनो धावसि किं मुधा।
अनाविलमिदं ब्रह्मसरः किं नावगाहसे॥

(घ)

(४) पातालमाविशसि यासि नभो विलंघ्य
दिङ्मंडलं भ्रमसि मानस चापलेन।
भ्रान्त्याति जातु विमलं न तदात्मनि त्वं
तद्ब्रह्म संस्पृशसि निर्वृतिमेसि केन॥

(घ)

(५) अहंकार, क्वापि व्रज वृजिन हे मा त्वमिह भू-
रभूमिर्दर्पाणामहमपसर त्वं पिशुन हे ।
अरे क्रोध स्थानान्तरमनुसरानन्यमनसां
त्रिलोकीनाथो नो हृदि वसतु देवो हरिरसौ ॥
(ग. च)

(६) मयि मेघाम्बुधौ स्वच्छे तत्त्वोऽयं विश्वबुद्बुदः
विलोलतडितो वेति विकल्पपटलः कुतः ।।
(च. घ. ग)

(७) इतो न किञ्चित् परतो न किञ्चित् यतो यतो यामि ततो न किञ्चित् ।
विचार्य पश्यामि जगन्न किञ्चित्, स्वात्मावबोधादधिकं न किञ्चित् ।
(ग. च.)

शान्तिशतकस्थपद्यानां सस्थाननिर्देशमनुक्रमकोशः

श्लोकांशाः	श्लोकसंख्या
धूर्तैरिन्द्रियनामभिः	७७
धैर्यं यस्य पिता	६१
नन्वात्मन्यवधीयतां	६८
नमस्यामो देवान्ननु (नीति २०) (सु० र० को०)	१
नाथे श्री पुरुषोत्तमे	११
निष्कन्दाः किमु (सु० र० को०)	८५
निःस्वो वष्टि शतं शती	२५
पाणिः पात्रं पवित्रं (वैराग्य ५४)	८६
पुत्रदारादिसंसारः	५५
पूरयित्वार्थिनामाशां	४६
पूर्वं तावत्कुवलयदृशां	६८
प्राणानां बत किं	१८
बीभत्साः प्रतिभान्ति	८, २०
बीभत्सा विषया (सदुक्ति०)	६
बुद्धेरगोचरतया	७१
भवारण्यं भीमं तनु	६१
भिक्षाशनं भवनं (सु० र० को०)	२३
मन्निन्दया यदि जनः (सु० र० को०) (सूक्ति०)	६५
महता पूर्वपुण्येन	५७
महाशय्या भूमिर्मसृण	६०
मातर्मायि भगिनि कुमते	१०४
मातर्मेदिनि	१०५
मातर्लक्ष्मि भजस्व (वैराग्य ६६), (सु० र० को०)	९३
यत्क्षान्तिः समये	६६
यदा पूर्वं नासीदुपरि	३६
यदा प्रकृत्यैव जनस्य	३४

श्लोकांशाः	श्लोकसंख्या
यदासीदज्ञानं (वैराग्य ८६)	९६
यदासौ दुर्वारः	२२
यदेते साधूनामुपरि (भर्तृ०), (सदुक्ति०), (सु० र० को०)	८१
ये तीक्ष्णदुर्जननिकार	४५
रम्यं हर्म्यतलं (वैराग्य० ७०) (सूक्ति०)	४२
रेतःशोणितयोरियं (सु० र० को०)	२७
लक्ष्मीर्निर्वृतिमेति	८३
लब्धाः श्रियः सकल	८४
वक्त्रं मुग्ध निषेवसे	१३
वनेषु दोषाः प्रभवन्ति	५२
वन्यान्तरचरतस्तथा	१०२
वासो वल्कलमास्तरः (सु० र० को०)	४६
वासः शून्यमयत्न	१४
विमलमतिभिः	४१
विवेकः किं सोऽपि	५३
विशीर्णः प्रारम्भो	५
विषयविषधराणां	७५
शय्या शाद्वलमासनं (वैराग्य ९६)	४८
शुचा पात्रं धात्री	२६
श्रृणु हृदय रहस्यं	२९
सत्यं वक्तुमशेषमस्ति	८७
सन्ति स्वादुफला	८८
सन्तोषसन्ततिकरं	२
समाश्लिष्यत्युच्चैर्	३०
संभोगाद्विषयामिषस्य	७०
सर्वप्राणविनाश (सु० र० को०)	४०

शान्तिशतके उद्धृतानां ग्रन्थानां सूचीबन्धः नामसंक्षिप्तिश्च

ऋग्वेद—अजमेर, सं० १९२२।

कम्पे० टु सं० लि०—ए कम्पैनियन टु संस्कृत लिटरेचर, एस० सी० बनर्जी।

का० सं०—काव्यसंग्रह, कलकत्ता, १८७४।

क्ला० सं० लि०—क्लासिकल संस्कृत लिटरेचर, ए० बी० कीथ, (हिन्दी अनुवाद), चारुदत्त शास्त्री, वाराणसी, १९७६।

नीतिप्रवेशिका—जे० एस० मैकेन्जी।

नीतिवाक्यामृतम्—सोमदेव सूरि, १९७६।

म० सु० सं०—महासुभाषित संग्रह, लुडविक स्टर्नबाख, भाग १, दिल्ली, १९७४।

मोनियर विलियम्स—इंग्लिश संस्कृत डिक्शनरी, दिल्ली-७।

सदुक्ति—सदुक्तिकर्णामृत, श्रीधर दास, कलकत्ता, १९६५।

सु० र० को०—सुभाषितरत्नकोश, हार्वर्ड यूनिवर्सिटी प्रेस, १९५७।

सु० र० भा०—सुभाषितरत्न भाण्डागार, निर्णय सागर प्रेस, १९५२।

सं० सा० इति०—संस्कृत साहित्य का इतिहास, वाचस्पति गैरोला, वाराणसी, १९६०।

वै०—वैराग्यशतक, भर्तृहरि।

एच० ओ० इ० लि०—हिस्ट्री ऑफ इण्डियन लिटरेचर, एम० विन्टरनिट्ज़, भाग ३ (१), दिल्ली, १९६३।

हि० आ० क्ला० सं० लि०—हिस्ट्री आफ क्लैसिकल संस्कृत लिटरेचर, एम० कृष्णमाचारियर, दिल्ली, १९७०।